CC-0. In Public Domain. Digitization by eGangotri

सं. १६८५२.

अभिधावृत्तिमातृका

श्रीमन्मुकुलभट्टप्रणीता ।

तथा

शब्दव्यापारविचारः

श्रीमद्राजानकमम्मटाचार्यविरचितः ।

मूल्यं ६ आणकाः ।

491.2
BHA

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सा. 95 ८ २ R.

ABHIDHÂVRITTIMÂTRIKÂ

OF

MUKULA BHATTA

AND

SHABDAVYÂPÂRA-VICHÂRA

OF

RÂJÂNAKA MAMMATÂCHÂRYA.

सा. ९५ ८ २ R.

EDITED BY

MANGESH RÂMKRISHNA TELANG.

PUBLISHED BY

TUKÂRÂM JÂVAJÎ,

PROPRIETOR OF THE "NIRNAYA-SAGAR" PRESS,

BOMBAY.

1916.

Price 6 Annas.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

491.2
B44

Published by Tukaram Javaji, and Printed by Ramchandra Yesu Shedge, at the "Nirnaya-sagar" Press, 23, Kolbhat Lane, BOMBAY.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द० ३३६०

अभिधावृत्तिमातृका

श्रीमन्मुकुलभट्टप्रणीता ।

तथा

शब्दव्यापारविचारः

श्रीमद्राजानकमम्मटाचार्यविरचितः ।

इदं

प्रकरणद्वयं

मङ्गेश रामकृष्ण तेलङ्ग इत्येतैः

संस्कृतम् ।

मुम्बय्यां

तुकाराम जावजी

इत्येतैः स्वीये निर्णयसागराख्यमुद्रणयन्त्रेऽङ्कयित्वा प्रकाशितम् ।

शके १८३८ सन १९१६.

मूल्यं ६ आणकाः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri





Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सा. १३८५R.

प्रस्तावना ।

श्रीमन्मुकुलभट्टप्रणीता **अभिधावृत्तिमातृका** तथा श्रीमन्मम्मटाचार्यविरचितः **शब्दव्यापारविचार** इत्येतत्प्रकरणद्वयं शब्दवृत्त्येकविषयकमनतिविस्तृतं चेति कृत्वा ग्राहकजनानुकूल्यायैकत्र मुद्रयित्वा प्रकाश्यते ।

(अभिधावृत्तिमातृका)

तत्राभिधावृत्तिमातृकायाः प्रणेता काश्मीरदेशीयः श्रीमन्मुकुलपण्डितः । अस्य पितुर्नाम भट्टकल्लट इत्यभिधावृत्तिमातृकागतान्तिमपद्याज्ज्ञायते । अस्य जीवितसमयनिर्णये नोपलभ्यते किमपि प्रमाणम् । तथाप्यस्य शिष्यः काव्यालङ्कारसारलघुवृत्तिग्रन्थनिर्माता श्रीमत्प्रतीहारेन्दुराजः खिस्तवर्षस्य नवमदशमशतकयोर्मध्ये बभूवेति तर्क्यते । अतो यथार्थकालनिर्णायकप्रमाणान्तरोपलब्धिपर्यन्तं प्रतीहारेन्दुराजस्य गुरोर्मुकुलभट्टस्यापि समयः स एवेत्यनायत्याभ्युपगन्तव्यम् । अस्मिन्नभिधावृत्तिमातृकाग्रन्थे महाभाष्यकारः, शबरस्वामी, भट्टकुमारिलः, तथा भर्तृमित्र इत्येतेषां प्राचीनग्रन्थकर्तृणां नामान्युपलभ्यन्ते । भर्तृहरिविरचितस्य वाक्यपदीयग्रन्थस्याप्यत्रोल्लेखः कृतो दृश्यते । मुकुलभट्टेनान्ये केऽपि ग्रन्थाः प्रणीता न वेति जिज्ञासायां नोपलभ्यते किमपि विनिगमकं प्रमाणम् ।

(शब्दव्यापारविचारः)

शब्दव्यापारविचार इत्यन्वर्थकाभिधानस्य प्रकरणस्य प्रणेता व्याकरणाद्यनेकशास्त्रपारंगतः श्रीमद्राजानकमम्मटाचार्यः । अयमपि काश्मीरदेशवास्तव्य एवासीत् । साहित्यशास्त्रे प्रमाणभूतः काव्यप्रकाशाख्यया प्रसिद्धोऽतिगभीरार्थग्रन्थोऽप्यनेनैव विरचितः । अयं खिस्तवर्षस्यैकादशशतके बभूवेति विदुषां मतम् । मम्मटाचार्यस्याधिकमितिवृत्तं जिज्ञासुभिः श्रीवामनाचार्यझळकीकरप्रकाशितकाव्यप्रकाशस्योपोद्घाते द्रष्टव्यमिति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतत्प्रकरणयुग्मस्यादर्शपुस्तकमेकैकमेव पुण्यपत्तनस्थराजकीयपुस्तक
लये वर्तमानं तदधिकारिभिः "प्रोफेसर विनायक सखाराम घाटे" इत्ये
संस्करणार्थं दत्वानुगृहीतोऽस्मीति स्मरामि तेषामुपकृतिम् ।

मुद्रितपत्रशोधनावसरे निर्णयसागरमुद्रणालयाधिपतिसंग्रहस्थाद
पुस्तकान्तरावलोकनेन कतिपयस्थलेषु शुद्धपाठनिर्णयार्थमस्मत्सुहृद्वरैर्वे
शा० वासुदेवशास्त्री पणशीकर इत्येतैर्निरपेक्षतया कृतसाहाय्योऽस्मी
तेषां सौजन्यमुद्घोषयामि ।

कारवारपुरे
चैत्र व० १० शके १८३८

विद्वदनुचरः
मङ्गेशशर्मा.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अभिधावृत्तिमातृकाया विषयसूची ।

विषयः	पृ.
मुख्यार्थविचारः	१
मुख्यार्थविभागः	२
लक्षणाभेदाः	६
शुद्धा उपादानलक्षणा	६
शुद्धा लक्षणलक्षणा	६
उपचारमिश्रलक्षणाभेदाः	७
त्रिस्कन्धाया लक्षणाया विषयविभागः	९
लक्षणापेक्षणीयानां विचारः	१०
अभिहितान्वयादिपक्षचतुष्टये लक्षणाकक्षाविभागः	१५
मुख्यार्थासंभवादिनिबन्धनत्रितयसमुद्भवलक्षणात्रयनिरूपणम्	१७
वाच्यस्यात्यन्ततिरस्कारादित्रितयस्य विषयविभागः	१८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतत्प्रकरणयुग्मस्यादर्शपुस्तकमेकैकमेव पुण्यपत्तनस्थराजकीयपुस्तकालये वर्तमानं तदधिकारिभिः "प्रोफेसर विनायक सखाराम घाटे" इत्येतैः संस्करणार्थं दत्वानुगृहीतोऽस्मीति स्मरामि तेषामुपकृतिम् ।

मुद्रितपत्रशोधनावसरे निर्णयसागरमुद्रणालयाधिपतिसंग्रहस्थादर्शपुस्तकान्तरावलोकनेन कतिपयस्थलेषु शुद्धपाठनिर्णयार्थमस्मत्सुहृद्वरैर्वे० शा० वासुदेवशास्त्री पणशीकर इत्येतैर्निरपेक्षतया कृतसाहाय्योऽस्मीति तेषां सौजन्यमुद्घोषयामि ।

कारवारपुरे
चैत्र व० १० शके १८३८

विद्वदनुचरः
मङ्गेशशर्मा.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अभिधावृत्तिमातृकाया विषयसूची ।

विषयः	पृ.
मुख्यार्थविचारः	१
मुख्यार्थविभागः	२
लक्षणाभेदाः	६
शुद्धा उपादानलक्षणा	६
शुद्धा लक्षणलक्षणा	६
उपचारमिश्रलक्षणाभेदाः	७
त्रिस्कन्धाया लक्षणाया विषयविभागः	९
लक्षणापेक्षणीयानां विचारः	१०
अभिहितान्वयादिपक्षचतुष्टये लक्षणाकक्षाविभागः	१५
मुख्यार्थासंभवादिनिबन्धनत्रितयसमुद्भवलक्षणात्रयनिरूपणम्	१७
वाच्यस्यात्यन्ततिरस्कारादित्रितयस्य विषयविभागः	१८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीः ।

अथ श्रीमुकुलभट्टप्रणीता

अभिधावृत्तिमातृका ।



(कारिकाः)

शब्दव्यापारतो यस्य प्रतीतिस्तस्य मुख्यता ।
अर्थावसेयस्य पुनर्लक्ष्यमाणत्वमुच्यते ॥ १ ॥
तत्र मुख्यश्चतुर्भेदो ज्ञेयो जात्यादिभेदतः ।
शुद्धोपचारमिश्रत्वाल्लक्षणा द्विविधा मता ॥ २ ॥
उपादानाल्लक्षणाच्च शुद्धा सा द्विविधोदिता ।
स्वसिद्ध्यर्थतयाक्षेपो यत्र वस्त्वन्तरस्य तत् ॥ ३ ॥
उपादानं लक्षणं तु तद्विपर्यासतो मतम् ।
आरोपाध्यवसानाभ्यां शुद्धगौणोपचारयोः ॥ ४ ॥
प्रत्येकं भिद्यमानत्वादुपचारश्चतुर्विधः ।
तटस्थे लक्षणा शुद्धा स्यादारोपस्त्वदूरगे ॥ ५ ॥
निगीर्णेऽध्यवसानं तु रूढ्यासन्नतरत्वतः ।
वक्तुर्वाक्यस्य वाच्यस्य रूपभेदावधारणात् ॥ ६ ॥
लक्षणा षट्प्रकारैषा विवेक्तव्या मनीषिभिः ।
अन्वयेऽभिहितानां सा वाच्यत्वादूर्ध्वमिष्यते ॥ ७ ॥
अन्वितानां तु वाच्यत्वे वाच्यत्वस्य पुरःस्थिता ।
द्वये द्वयमखण्डे तु वाक्यार्थे परमार्थता ॥ ८ ॥
नास्त्यसौ कल्पितेऽर्थे तु पूर्ववत्प्रविभिद्यते ।
मुख्यार्थासंभवात्सेयं मुख्यार्थासक्तिहेतुका ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रूढेः प्रयोजनाद्वापि व्यवहारेऽवलोक्यते ।
सादृश्ये वैपरीत्ये च वाच्यस्यातितिरस्क्रिया ॥ १० ॥
विवक्षा चाविवक्षा च संबन्धसमवाययोः ।
उपादाने विवक्षाथ लक्षणे त्वविवक्षितम् ॥ ११ ॥
तिरस्क्रिया क्रियायोगे क्वचित्तद्विपरीतता ।
विवर्तमानं वाक्तत्वं दशधैव विलोक्यते ॥ १२ ॥
संहृतक्रमभेदे तु तस्मिंस्तेषां कुतो गतिः ।
इत्येतदभिधावृत्तं दशधात्र विवेचितम् ॥ १३ ॥
पदवाक्यप्रमाणेषु तदेतत्प्रतिबिम्बितम् ।
यो योजयति साहित्ये तस्य वाणी प्रसीदति ॥ १४ ॥
भट्टकल्लटपुत्रेण मुकुलेन निरूपिता ।
सूरिप्रबोधनायेयमभिधावृत्तिमातृका ॥ १५ ॥

इति श्रीभट्टकल्लटात्मजमुकुलविरचिता अभिधावृत्ति-
मातृकाकारिकाः समाप्ताः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द० ३६७०

पु० आ० ८५५

श्रीः

काश्मीरकश्रीमुकुलभट्टविरचिता

अभिधावृत्तिमातृका ।

इह खलु भोगापवर्गसाधनभूतानां तद्विपर्ययपरिवर्जनप्रयोजनानां च पदार्थानां निश्चयमन्तरेण व्यवहारोपारोहिता नोपपद्यते । तथाहि—सर्वाणि प्रमाणानि प्रमेयावगतिनिबन्धनभूतानि निश्चयपर्यवसायितया प्राधान्यं भजन्ते । प्रमाणनिबन्धना च भोगापवर्गसाधनभूतानां तद्विपर्ययपरिवर्जनप्रयोजनानां च पदार्थानामवगतिः । अतो निश्चय एव तेषां पदार्थानां व्यवहारोपारोहनिबन्धनम् । निश्चयश्च शब्दसंभेदेनार्थं गोचरीकरोति । शब्दस्य च मुख्येन लाक्षणिकेन वाभिधाव्यापारेणार्थावगतिहेतुत्वमिति मुख्यलाक्षणिकयोरभिधाव्यापारयोरत्र विवेकः क्रियते । कः पुनर्मुख्यो लाक्षणिको वाभिधाव्यापार इत्याशङ्क्य विषयोपदर्शनद्वारेण मुख्यलाक्षणिकौ शब्दव्यापारावुपवर्णयितुमाह—

शब्दव्यापारतो यस्य प्रतीतिस्तस्य मुख्यता ।
अर्थावसेयस्य पुनर्लक्ष्यमाणत्वमुच्यते ॥ १ ॥

शब्दव्यापाराद्यस्यावगतिस्तस्य मुख्यत्वम् । स हि यथा सर्वेभ्यो हस्तादिभ्योऽवयवेभ्यः पूर्वं मुखमवलोक्यते, तद्वदेव सर्वेभ्यः प्रतीयमानेभ्योऽर्थान्तरेभ्यः पूर्वमवगम्यते । तस्मान्मुखमिव मुख्य इति शाखादियान्तेन मुख्यशब्देनाभिधीयते । तस्योदाहरणं 'गौरनुबन्ध्य' इति । अत्र हि गोशब्दव्यापाराद्यागसाधनभूता गोत्वलक्षणा जातिरवगम्यते । अतस्तस्या मुख्यता । तदेवं शब्दव्यापारगम्यो मुख्योऽर्थः । यस्य तु शब्दव्यापारावगम्यार्थपर्यालोचनयावगतिस्तस्य लाक्षणिकत्वम् । यथा पूर्वसिंन्नेवोदाहरणे व्यक्तेः । सा हि न शब्दव्यापारादवसीयते । "विशेष्यं नाभिधा गच्छे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्क्षीणशक्तिर्विशेषणे'' इति न्यायाच्छब्दस्य जातिमात्रपर्यवसितत्वात्। जातिस्तु व्यक्तिमन्तरेण यागसाधनभावं न प्रतिपद्यत इति शब्दप्रत्यायितजातिसामर्थ्यादत्र जातेराश्रयभूता व्यक्तिराक्षिप्यते। तेनासौ लाक्षणिकी। एवमयं मुख्यलाक्षणिकात्मविषयोपवर्णनद्वारेण शब्दस्याभिधाव्यापारो द्विविधः प्रतिपादितो निरन्तरार्थविषयः सान्तरार्थनिष्ठश्च। संप्रति मुख्यस्याभिधाव्यापारस्य चातुर्विध्यमभिधीयते—

तत्र मुख्यश्चतुर्भेदो ज्ञेयो जात्यादिभेदतः।

तयोर्मुख्यलाक्षणिकयोरर्थयोर्मध्यान्मुख्यस्यार्थस्य चत्वारो भेदाः जात्यादिभेदात्। चतुष्टयी हि शब्दानां प्रवृत्तिर्भगवता **महाभाष्यकारेणो**पवर्णिता जातिशब्दा गुणशब्दाः क्रियाशब्दा यदृच्छाशब्दाश्चेति। तथाहि— सर्वेषां शब्दानां स्वार्थाभिधानाय प्रवर्तमानानामुपाध्युपरञ्जितविषयविवेकत्वादुपाधिनिबन्धना प्रवृत्तिः। उपाधिश्च द्विविधः वक्तृसन्निवेशितो वस्तुधर्मश्च। कश्चित्खलु वक्ता तस्मिंस्तस्मिन्वस्तुन्युपाधितया संनिवेश्यते। कश्चित्तु वस्तुधर्म एव। तत्र यो वक्ता यदृच्छया तत्तत्संज्ञिविषयशक्त्यभिव्यक्तिद्वारेण तस्मिंस्तस्मिन्संज्ञिनि संनिवेश्यते स वक्तृसंनिवेशितो यथा डित्थादीनां शब्दानामन्त्यबुद्धिनिर्ग्राह्यं संदृतक्रमं स्वरूपम्। तत्खलु तां तामभिधाशक्तिमभिव्यञ्जयता वक्ता यदृच्छया तस्मिंस्तस्मिन्संज्ञिनि उपाधितया संनिवेश्यते। अतस्तन्निबन्धना यदृच्छाशब्दा डित्थादयः। येषामपि च डकारादिवर्णव्यतिरिक्तसंदृतक्रमस्वरूपाभावान्न डित्थादिशब्दस्वरूपं संदृतक्रमं संज्ञिप्वध्यवस्यत इति दर्शनं तेषामपि वक्तृयदृच्छाभिव्यज्यमानशक्तिभेदानुसारेण काल्पनिकसमुदायरूपस्य डित्थादेः शब्दस्य तत्तत्संज्ञाभिधानाय प्रवर्तमानत्वाद्यदृच्छाशब्दत्वं डित्थादीनामुपपद्यत एव। तदेवं पूर्वमुपदर्शितो यो वैयाकरणनयस्तदाश्रयेणोपाधिर्वक्तृसंनिवेशितस्वरूपाख्यो व्याख्यातः। यस्य तु वस्तुधर्मत्वेनोपाधेरवस्थानं तस्यापि द्वैविध्यं साध्यसिद्धताभेदात्। तत्र साध्योपाधिनिबन्धनाः क्रियाशब्दा यथा पचतीति। सिद्धस्य तूपाधिद्वैविध्यं जातिगुणभेदात्। कस्यचित्खलु सिद्धस्योपाधिः पदार्थस्य प्राणप्रदता यथा जातेः। न हि कश्चित्पदार्थो जातिसंबन्धम-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्तरेण स्वरूपं प्रतिलभते। यदुक्तं वाक्यपदीये—"न हि गौः स्वरूपेण गौर्नाप्यगौः, गोत्वाभिसंबन्धात्तु गौः" इति। कश्चित्पुनरुपाधिर्लब्धस्वरूपस्य वस्तुनो विशेषाधानहेतुः यथा शुक्लादिर्गुणः। न हि शुक्लादेर्गुणस्य पटादिवस्तुस्वरूपप्रतिलम्भनिबन्धनत्वम्। जातिमहिम्नैव तस्य वस्तुनः प्रतिलब्धस्वरूपत्वात्। अतोऽसौ लब्धस्वरूपस्य वस्तुनो विशेषाधानहेतुः। येऽपि च नित्याः परमाणुत्वादयो गुणास्तेषामपि सर्वेषां गुणजातीयत्वादेवंप्रकारत्वमेव। तदेवं प्राणप्रदोपाधिनिबन्धनत्वं यस्य शब्दस्य स जातिशब्दो यथा गवादिः। यस्मालब्धस्वरूपस्य वस्तुनो विशेषाधानहेतुरर्थः प्रतीयते स गुणशब्दो यथा शुक्लादिः।

ननु सर्वेषामपि गुणक्रियायदृच्छाशब्दाभिमतानां जातिनिबन्धनत्वम्। तथाहि—गुणशब्दानां तावच्छुक्लादीनां पयःशङ्खबलाकाद्याश्रयसमवेता ये शुक्लादिलक्षणा गुणा विभिन्नास्तत्समवेतसामान्यवाचिनः। एवं क्रियाशब्दानामपि गुडतिलतण्डुलादिद्रव्याश्रिता ये पाकादयोऽन्योन्यमन्यत्वेनावस्थिताः क्रियाविशेषास्तत्समवेतं सामान्यमेव वाच्यम्। यदृच्छाशब्दानां तु डित्थादीनां शुकसारिकामनुष्याद्युदीरितेषु भिन्नेषु डित्थादिशब्देषु समवेतं डित्थशब्दत्वादिकं सामान्यमेव यथायोगं संज्ञिष्वध्यस्तमवसेयम्। यदिं चोपचयापचययोगितया डित्थादौ संज्ञिनि प्रतिकालं भिद्यमानेष्वभिद्यमानो यन्महिम्ना डित्थो डित्थ इत्येवमादिरूपत्वेनाभिन्नाकारः प्रत्ययो बाधशून्यः संजायते तैस्तथाभूतं डित्थादिशब्दावसेयवस्तुसमवेतमेव डित्थत्वादिसामान्यमेष्टव्यम्। तच्च डित्थादिशब्दैरभिधीयते। अतश्च गुणक्रियायदृच्छाशब्दानामपि जातिशब्दत्वाच्चतुष्टयी शब्दानां प्रवृत्तिर्नोपपद्यते। अत्राभिधीयते—गुणक्रियाशब्दसंज्ञिव्यक्तीनामेव तत्तदुपाधिनिबन्धनभेदजुषामेकाकारतावगतिनिबन्धनत्वं न तु जातेरिति भगवतो **महाभाष्यकार**स्यात्राभिमतम्। यथा ह्येकमेव मुखं तैलखड्गोदकादर्शादीनां प्रतिबिम्बावगतिनिबन्धनानां भेदान्नानाकारत्वेन प्रत्यवभासते तथैकैव शुक्लादिव्यक्तिर्देशकालावच्छिन्ना तत्तत्कारणसामग्र्युपजनितशङ्खाद्याश्रयविशेषवशेन नानारूपतयाभिव्यक्तिमासादयन्ती विचित्रैव स्यादिति। अतश्च तस्याः शुक्लादिव्यक्तेरेकत्वाज्जातेश्च भिन्ना-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रयसमवेतत्वाच्छुक्लत्वादिजात्यभावान्न शुक्लादिशब्दानां जातिशब्दत्वम् । एवं पचतीत्यादौ डित्थशब्दादौ डित्थादौ च संज्ञिनि वाच्यम् । अत्राप्येकस्या एव पाकादिक्रियाव्यक्तेर्डित्थादिशब्दव्यक्तेर्डित्थादेश्च संज्ञिनो यथाक्रममभिव्यञ्जकानां पाकादीनां तथा ध्वनीनां वयोवस्थाविशेषाणां कौमारादीनां च यो भेदस्तद्वशेन नानाविधेन रूपेणावभासमानत्वात् स्थितमेतच्छब्दप्रवृत्तिनिमित्तानां चतुष्टान्मुख्यः शब्दार्थश्चतुर्विध इति ॥

अधुना लाक्षणिकस्य द्विभेदत्वमुपदर्शयितुमाह—

शुद्धोपचारमिश्रत्वाल्लक्षणा द्विविधा मता ॥ २ ॥

लक्षणाया द्विप्रकारत्वं शुद्धत्वादुपचारमिश्रत्वाच्च । शुद्धा तावल्लक्षणा गङ्गायां घोष इति । अत्र हि घोषं प्रति स्रोतोविशेषस्याधारता नोपपद्यत इति गङ्गाशब्दः स्वाभिधेयस्य स्रोतोविशेषस्य यः समीपभूतस्तटस्तं लक्षणयावगमयति । उपचारमिश्रा तु यत्र वस्त्वन्तरे उपचर्यते यथा गौर्वाहीक इति । अत्र हि गोशब्दो वाहीकशब्देनानुपपद्यमानसामानाधिकरण्याद्बाधितमुख्यार्थः सन् गोगता ये जाड्यमान्द्यादयो गुणास्तत्सदृशवाहीकगतजाड्यमान्द्यादिगुणलक्षणाद्वारेण गोगतजाड्यमान्द्यादिगुणसदृशजाड्यमान्द्यादिगुणोपेते वाहीक उपचरितः । तेनेयमुपचारमिश्रा लक्षणा । एवं शुद्धोपचारमिश्रत्वभेदेन लक्षणायां द्वैविध्यमुक्तम् ।

इदानीं तु शुद्धाया अपि लक्षणाया द्वैविध्यं दर्शयति—

उपादानाल्लक्षणाच्च शुद्धा सा द्विविधोदिता ।

येयं लक्षणा शुद्धा प्रतिपादिता सा द्विविधोक्ता । क्वचित्खल्वर्थान्तरोपादानेन लक्षणा प्रवर्तते, क्वचित्त्वर्थान्तरलक्षणेन । किं पुनरर्थान्तरस्योपादानं किंवा तस्य लक्षणमित्याशङ्क्याह—

स्वसिद्ध्यर्थतयाक्षेपो यत्र वस्त्वन्तरस्य तत् ॥ ३ ॥
उपादानं लक्षणं तु तद्विपर्यासतो मतम् ।

यत्र स्वसिद्ध्यर्थतया वस्त्वन्तरस्याक्षेपो भवति तत्रोपादानम् । यथा गौरनुबन्ध्य इति । अत्र हि गोत्वस्य यागं प्रति साधनत्वं शाब्दं व्यक्त्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षेपमन्तरेण नोपपद्यत इति तत्सिद्ध्यर्थतया व्यक्तेराक्षेपः । यथा च पीनो देवदत्तो दिवा न भुङ्क्ते इति । अत्र हि पीनत्वं दिनाधिकरणभोजनाभावविशिष्टतयावगम्यमानमेव कार्यत्वात्स्वसिद्ध्यर्थत्वेन कारणभूतं रात्रिभोजनमाक्षेपादभ्यन्तरीकरोति । न हि पीनत्वस्य रसायनाद्युपयोगजन्यता । प्रमाणान्तरेण तदभावावसाये सत्येतस्योदाहरणत्वात् । पीनत्वस्य चात्र दिनाधिकरणभोजनाभावविशिष्टत्वेन रसायनाद्युपयोगबाधहेतुत्वात् । अत्र च रात्रौ भुङ्क्ते इत्येतच्छब्दाक्षेपपूर्वकतया प्रमाणस्यापरिपूर्णस्य परिपूरणाच्छ्रुतार्थापत्तित्वं भवत्वथवा कारणस्यैव रात्रिभोजनस्याक्षेप इति सर्वथा स्वसिद्ध्यर्थत्वेनार्थान्तरस्याक्षेपपूर्वकतयान्तर्भावनादुपादानत्वमुपपद्यते । यत्र तु पूर्वोदितोपादानरूपविपर्याससंश्रयान्न स्वार्थसिद्ध्यर्थतयार्थान्तरस्याक्षेपः अपि त्वर्थान्तरसिद्ध्यर्थत्वेन स्वार्थसमर्पणं तत्र लक्षणं, यथा पूर्वमुदाहृतं गङ्गायां घोष इति। अत्र हि तटस्य घोषाधारतया धारणक्रियान्वितस्य गङ्गाशब्देन स्वसमर्पणं क्रियते । अतोऽर्थान्तरभूतं तटमवगमयितुं गङ्गाशब्देन स्ववाच्यभूतः स्रोतोविशेषोऽत्र समर्प्यते इत्यर्थान्तरसिद्ध्यर्थत्वेन स्वार्थसमर्पणम् । एवं चात्र पूर्वोदितोपादानरूपविपर्यासाल्लक्षणत्वम् ।

एवं शुद्धा लक्षणा द्विविधा प्रविभक्ता । इदानीमुपचारमिश्रां चतुर्भेदत्वेन निरूपयितुमाह—

आरोपाध्यवसानाभ्यां शुद्धगौणोपचारयोः ॥ ४ ॥
प्रत्येकं भिद्यमानत्वादुपचारश्चतुर्विधः ।

द्विविध उपचारः शुद्धो गौणश्च । तत्र शुद्धो यत्र मूलभूतस्योपमानोपमेयभावस्याभावेनोपमानगतगुणसदृशगुणयोगलक्षणासंभवात्कार्यकारणभावादिसंबन्धाल्लक्षणया वस्त्वन्तरे वस्त्वन्तरमुपचर्यते, यथा आयुर्घृतमिति । अत्र ह्यायुषः कारणे घृते तद्गतकार्यकारणभावोलक्षणापूर्वकत्वेनायुष्टं कार्यं तच्छब्दश्चेत्युभयमुपचरितम् । तस्माच्छुद्धोऽयमुपचारः । गौणः पुनरुपचारो यत्र मूलभूतोपमानोपमेयभावसमाश्रयेणोपमानगतगुणसदृशगुणयोगलक्षणां पुरःसरीकृत्योपमेये उपमानशब्दस्तदर्थश्चाध्यारोप्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स हि गुणेभ्य आगतत्वाद्गौणशब्देनाभिधीयते । यथा गौर्वाहीक इति । अत्र हि गोगतजाड्यमान्द्यादिगुणसदृशजाड्यमान्द्यादियोगाद्वाहीके गोशब्दगोत्वयोरुपचारः । केचित्तूपचारे शब्दोपचारमेव मन्यन्ते नार्थोपचारम् । तदयुक्तम् । शब्दोपचारस्यार्थोपचाराविनाभावित्वात् । एवमयमुपचारः शुद्धगौणभेदेन द्विविधोऽभिहितः । तस्य च प्रत्येकं द्वैविध्यमध्यारोपाध्यवसानाभ्याम् । यत्राध्यारोप्यारोपविषययोर्भेदमनपह्नुत्यैव वस्त्वन्तरे वस्त्वन्तरमुपचर्यते, तत्रानपह्नुतस्वरूप एव वस्त्वन्तरे वस्त्वन्तरस्याधिकस्यारोप्यमाणत्वादध्यारोपः, यथा पूर्वोक्तयोरुदाहरणयोः । तथाहि— आयुर्घृतमित्यत्र नायुर्लक्षणकार्यान्तर्लीनतया कारणभूतस्य घृतस्य प्रतिपत्तिः । स्वरूपेणैव तस्य प्रतिपत्तेः । स्वरूपेणैव तु तस्य प्रतीयमानस्यायुःकारणत्वादायुष्ट्वं प्रतीयते । तेनात्राध्यारोपः । एवं गौर्वाहीक इत्यत्राप्युपमानोपमेयस्वरूपानपह्नवात् । तदेवं यत्रोपचर्यमाणेनोपचर्यमाणविषयस्य स्वरूपं नापह्नूयते तत्राध्यारोपः । यत्र तूपचर्यमाणविषयस्योपचर्यमाणेऽन्तर्लीनतया विवक्षितत्वात्स्वरूपापह्नवः क्रियते तत्राध्यवसानम् । तत्र शुद्धोपचारेऽध्यवसानस्योदाहरणं पञ्चाला इति । अत्र हि पञ्चालापत्यनिवासाधिकरणत्वाज्जनपदे लक्षितलक्षणया पञ्चालशब्दः प्रयुज्यते । पञ्चालेनापत्यानां लक्षणादपत्यैश्च स्वनिवासाधिकरणस्य जनपदस्य । न चात्रोपचर्यमाणार्थविषयस्योपचर्यमाणाद्भेदेन प्रतिपत्तिः । उपचर्यमाणार्थनिगीर्णतयैव तस्य प्रतिपत्तेः । तेनात्रोपचारत्वं रूढिमाहात्म्याद्भ्रष्टमिव लक्ष्यते । अतोऽत्राध्यवसानगर्भः शुद्ध उपचारः । गौणोपचारे त्वध्यवसानस्योदाहरणम् राजेति । राजशब्दो ह्यत्र प्रयोगदर्शनात्क्षत्रिये मुख्यया वृत्त्या प्रयुक्तः सन् अन्यत्र शूद्रादौ क्षत्रियगतजनपदपरिपालनसदृशजनपदपरिपालनयोगलक्षणपूर्वकतया गौणवृत्त्या युज्यते । न चात्र झगित्येव गौणत्वस्यावगतिः । विचारणाव्यवस्थाप्यत्वात् । तेनात्र गौणत्वं झगित्येवाप्रतीयमानत्वाद्भ्रष्टं सद्विचारणया समधिगम्यते । अतोऽत्राध्यवसानगर्भो गौण उपचारः । तदेवमुपचारश्चतुर्विधः प्रविभक्तः । एतेन चतुर्विधेनोपचारेण सह पूर्वोक्तौ द्वौ लक्षणाभेदौ संकलय्य षट्प्रकारा लक्षणा वक्तव्या ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एषा च लक्षणा त्रिस्कन्धा शुद्धत्वादध्यारोपादध्यवसानाच्च । तत्र शुद्धस्कन्धस्य द्वैविध्यमुपादानलक्षणाभ्यामुक्तम् । अध्यारोपाध्यवसानस्कन्धयोरपि प्रत्येकं द्विप्रभेदता । शुद्धगौणोपचारमिश्रत्वात् । तत्रैतेषां त्रयाणां स्कन्धानां विषयविभागं प्रदर्शयितुमाह—

तटस्थे लक्षणा शुद्धा स्यादारोपस्त्वदूरगे ॥ ५ ॥
निगीर्णेऽध्यवसानं तु रूढ्यासन्नतरत्वतः ।

यैषा लक्षणा शुद्धा उपादानलक्षणात्मकत्वेन द्विप्रभेदा प्रतिपादिता सा लक्षकार्थानुपरक्तत्वात् तटस्थतया प्रतीयमाने लक्ष्येऽर्थे द्रष्टव्या । न हि तत्र लक्षकार्थोपरक्ततया लक्ष्यस्यार्थस्यावगतिः । तथा हि—गङ्गायां घोष इत्यत्र घोषाधिकरणभूततटोपलक्षणाभिसंधानेन गङ्गायां घोषो न वितस्तायामिति गङ्गाशब्दे प्रयुज्यमाने तटस्य स्रोतोविशेषेणोपलक्षकत्वमात्रोपयुक्तत्वेनोपरागो न प्रतीयते । तटस्थत्वेनैव तस्य तटस्य प्रत्ययात् । एवमुपादानेऽपि वाच्यम् । यथा पीनो देवदत्तो दिवा न भुङ्क्ते इति । यदा तु गङ्गाशब्दाभिधेयस्य स्रोतोविशेषस्याविदूरवर्तितया तटमनपह्नुतस्वरूपं स्रोतोविशेषोपरक्ततया विवक्षितं भवति तदा पूर्वस्मिन्नुदाहरणेऽध्यारोपो भवति । स्रोतोविशेषोपरक्तस्य तटस्य प्रतीतेः स्रोतोविशेषाविदूरवर्तित्वात् स्रोतोविशेषरूपे तटे घोष इति । यदा त्वत्यन्तमासन्नतां घोषं प्रति स्रोतोविशेषस्य प्रतिपादयितुमेतद्वाक्यं स्रोतोविशेषनिगीर्णतया तटमपह्नुत्य प्रयुज्यते गङ्गायामेव साक्षाद्घोषो न त्वन्यत्रेति तदाध्यवसानम् । यथा चैतच्छुद्धोपचारनिष्ठतयाध्यारोपाध्यवसानयोरुदाहरणमुक्तं तथा गौणेऽप्युपचारे वाच्यं गौर्वाहीक इति गौरेवायं साक्षादिति च । अत्रापि हि यथाक्रमं गोगतगुणसदृशगुणयोगद्वारेण गोरविदूरत्वेन वाहीकस्य विवक्षितत्वात् गोत्वाध्यारोपः । गोगतानां तु गुणानामुत्कटत्वेन वाहीकस्य गोत्वाध्यवसानम् । यथा चासन्नतरत्वेनाध्यवसानं पूर्वं प्रविभक्तं तथा रूढित्वेनापि प्रविभक्तव्यम् । यथा पूर्वोपदर्शितयोरुदाहरणयोः पञ्चाला इति तथा राजेति । तदिदमुक्तं **रूढ्यासन्नतरत्वत इति** । रूढित्वादासन्नतरत्वाच्च निगीर्णेऽर्थेऽध्यवसानं स्यादित्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननु मुख्यार्थे शब्दस्य संबन्धावधारणात्प्रतिपादकत्वमुपपद्यते न तु लाक्षणिके, तद्विपर्ययात् । तथा हि । संबन्धावधारणसमये व्यवहर्तृगतयोस्तावच्छब्दप्रयोगार्थप्रतिपत्त्योरविभक्तोद्देशवाक्यवाक्यार्थनिष्ठतया पूर्वं हेतुफलभावावसायो भवति । तदनन्तरं च त्रिचतुरादिदर्शनेभ्योऽन्वयव्यतिरेकाभ्यां वाक्यवाक्यार्थोद्देशप्रविभागगते ये शब्दप्रयोगार्थप्रतिपत्ती तन्निष्ठकार्यकारणभावावधारणम् । तदुत्तरकालं च व्यवहर्तृगतार्थप्रतिपत्त्यन्यथानुपपत्त्या शब्दार्थसंबन्धावगतिः । सा च मुख्य एवार्थे जात्यादौ चतुर्विधे न तु लाक्षणिके षट्प्रकारे । न हि लाक्षणिकेनार्थेन सह शब्दस्य संबन्धः । मुख्येनैवार्थेन परिदृश्यते । तथाभावे हि सति तस्य मुख्यत्वमेव स्यान्न लाक्षणिकत्वम् । अथ शब्दस्य मुख्यो योऽसावर्थस्तेन सह संबन्धो लक्ष्यमाणस्यार्थस्य दृष्ट इति तद्द्वारेण शब्दात्तस्यावगतिरित्यभिधीयते, एवं सति यदि निरपेक्षः स्वार्थप्रतिपादनद्वारेण लक्ष्यमाणमर्थमवगयति सर्वदा तमर्थमवगमयेत् । अथ सापेक्षः । किं तस्यापेक्षणीयमित्याशङ्क्याह—

वक्तुर्वाक्यस्य वाच्यस्य रूपभेदावधारणात् ॥ ६ ॥
लक्षणा षट्प्रकारैषा विवेक्तव्या मनीषिभिः ।

यः परप्रतिपत्तये वाक्यमुच्चारयति स वक्ता । साकाङ्क्षाणां पदानामेकार्थः समूहो वाक्यम् । शब्देन मुख्यं लाक्षणिकं वाभिधाव्यापारमाश्रित्य यद्गोचरीक्रियते तद्वाच्यम् । एतेषां त्रयाणां वक्त्रादीनां व्यस्तसमस्तभेदभिन्नानां देशकालावस्थावैलक्षण्यगतसमस्तव्यस्तभेदसंयोजितानां यः स्वभावभेदप्रपञ्चस्तत एषा षट्प्रकारा लक्षणा परामर्शकुशलैर्विवेचनीया । तथाविधवक्त्रादिसामग्र्यपेक्षयैव शब्दानां स्वार्थमवगमयतां स्वार्थद्वारेण लक्ष्यमाणार्थसंबन्धस्य वृद्धव्यवहारेणावधारितत्वात् । एतदुक्तं भवति । न शब्दानामनवधारितलाक्षणिकार्थसंबन्धानां लाक्षणिकमर्थं प्रति गमकत्वं, नापि च तत्र साक्षात्संबन्धग्रहणं, किं तर्हि वक्त्रादिसामग्र्यपेक्षया स्वार्थव्यवधानेनेति । यदुक्तमाचार्यशबरस्वामिना—"कथं पुनः परशब्दः परत्र वर्तते । स्वार्थाभिधानेनेति ब्रूमः" इति । अत्र हि स्वार्थद्वारेण लक्ष्यमाणार्थाभिनिवेशिता शब्दानामुक्ता । पुनश्चासावेवाह—"लक्षणापि हि लौकिक्येव" इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्र हि संबन्धावधारणसापेक्षाणां शब्दानां लक्ष्यमाणेऽर्थे प्रवृत्तिरुक्ता। व्यवहारोपारूढानि हि प्रत्यक्षादीनि प्रमाणानि लोकशब्देनाभिधीयन्ते। लोके एव विदिता लौकिकी व्यवहारावगम्या। परिगृहीतसंबन्धशब्दनिष्ठेत्यर्थः। तदुक्तं **भट्टकुमारिलेन** "निरूढा लक्षणाः काश्चित्सामर्थ्यादभिधानवत्। क्रियन्ते साम्प्रतं काश्चित् काश्चिन्नैव त्वशक्तितः ॥" इति। तत्र निरूढा लक्षणाः राजेत्यादिकाः। साम्प्रतं क्रियन्ते या वृद्धव्यवहारवक्राद्यपेक्षया तथाविधेऽन्यत्र विषये परिदृष्टस्वभावाः। यथा—

स्निग्धश्यामलकान्तिलिप्तवियतो वेल्लद्बलाका घना
वाताः शीकरिणः पयोदसुहृदामानन्दकेकाः कलाः।
कामं सन्तु दृढं कठोरहृदयो रामोऽस्मि सर्वं सहे
वैदेही तु कथं भविष्यति ह हा हा देवि धीरा भव ॥" इति।

अत्र हि लिप्तशब्दः कान्तेः कुङ्कुमादिवल्लेपनसाधनत्वाभावाद्बाधितमुख्यार्थः। अतस्तेन स्वार्थगतो योऽसावीषत्तिरोधीयमानत्वादिधर्मः प्रतिपादितः तत्सदृशेषत्तिरोधीयमानत्वादिधर्मयोगात्कान्तिसंपृक्तोऽर्थो लक्ष्यते। एवं सुहृच्छब्देनापि पयोदानामचेतनत्वेन मैत्रीसंबन्धाभावान्मुख्यशब्दार्थबाधे सति सुहृद्वता ये ते सांमुख्यादयो धर्मास्तत्सदृशसांमुख्यादिधर्मयोगिनः पयोदाभिमुखा मयूरा लक्ष्यन्ते। रामशब्दस्यापि प्रतिपन्नत्वात्संज्ञिनो मुख्यशब्दार्थबाधः। अतस्तेनापि राज्यभ्रंशवनवाससीतापनयनपितृमरणादयः स्वाभिधेयभूतार्थैकगामिनोऽसाधारणदुःखहेतवो धर्मा विशिष्टसामग्र्यनुप्रविष्टेन लक्षिताः। तदेवमादीनां लक्षणानां सांप्रतं क्रियमाणता। यासां तु लक्षणानां न वृद्धव्यवहारे दृष्टता, नच तस्मिन् शब्दे राजशब्दवद्दर्शनं, नापि च तज्जातीयेषु शब्दान्तरेषु लिप्तादिशब्दवत्तासामशक्यत्वादक्रियमाणत्वमेव। यथा—

मध्येसमुद्रं ककुभः पिशङ्गीर्या कुर्वती काञ्चनभूमिभासा।
तुरङ्गकान्ताननहव्यवाहज्वालेव भित्त्वा जलमुल्ललास ॥

अत्र हि तुरङ्गकान्ताननहव्यवाहशब्दो वडवामुखाग्नौ लक्षणया प्रयुक्तः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न चासौ वडवामुखाग्नौ निरूढो नापि च तज्जातीयः शब्दो विशिष्टसामग्र्यनुप्रविष्टतया विद्धाविद्धार्थावगाहित्वेन परिदृष्टः ।

ननु द्विरेफादीनां शब्दानां रेफद्वितयानुगतभ्रमरादिशब्दलक्षणाद्वारेण यथा षट्पदादौ प्रवृत्तिस्तथा तुरङ्गकान्तानन्हव्यवाहशब्दस्यापि वडवामुखाग्नौ वडवादिशब्दलक्षणाद्वारेण कथं प्रवृत्तिर्न स्यात् । तज्जातीये द्विरेफादौ शब्दलक्षणायाः परिदृष्टत्वात् । नैतत् । यतो वृद्धव्यवहाराभ्यनुज्ञातेष्वेव शब्देषु तज्जातीयशब्ददर्शनाल्लक्षणात्वमभ्युपगम्यते, न तु सर्वत्र । अन्यथा सर्वेषामेव शब्दानां येन केनचिज्जातिलेशेन सर्वानर्थान्प्रति लक्षणाशब्दत्वस्य वक्तुं शक्यत्वात् । न कश्चिच्छब्दः कंचिदर्थं प्रत्यगमकः स्यात् । वृद्धव्यवहाराभ्यनुज्ञानानभ्यनुज्ञानाभ्यां तु विषयविभागेऽङ्गीक्रियमाणे तुरङ्गकान्तानन्हव्यवाहेत्यादीनामसति प्रयोजने दुष्टत्वमेव, सति तु गुणार्थप्रतिपादनादिप्रयोजनसंभवे एवंविधानामपि लक्षणानामदुष्टत्वम् । तथाविधविषये वृद्धव्यवहारेण तासामभ्यनुज्ञातत्वात् । तदेवं वक्त्रादिसामग्र्यनुप्रवेशेन शब्दानां स्वार्थमर्पयतामर्थान्तरं प्रति वृद्धव्यवहारे स्वरूपद्वारेण सजातीयशब्दद्वारेण वा गमकतयावधारितानां लक्षकत्वमिति स्थितम् ।

तत्र वक्तृनिबन्धनत्वेन यत्र लाक्षणिकार्थोऽवगम्यते तत्रोदाहरणम्—

दृष्टिं हे प्रतिवेशिनि क्षणमिहाप्यस्मद्गृहे दास्यसि
प्रायो नैव शिशोः पितास्य विरसाः कौपीरपः पास्यति ।
एकाकिन्यपि यामि तद्वनमितः स्रोतस्तमालाकुलं
नीरन्ध्रा वपुरालिखन्तु जरठच्छेदा नलग्रन्थयः ॥ इति ।

अत्र हि परपुरुषसंभोगानुभवेच्छया संकेतस्थानं युवतिर्व्रजन्ती स्वप्रवृत्तिप्रयोजनं विशिष्टसंकेतस्थानाधारं परपुरुषसंभोगात्मकं तथा संभोगचिह्नानि नखदशनक्षतानि गात्रसंलग्नतया शङ्क्यमानाविर्भावानि यथाक्रमं भर्तृपिपासानिवृत्तिक्षमनादेयसरसपानीयानयनेन चिरच्छिन्नलग्रन्थिपरुषजर्जरप्रान्तजनयिष्यमाणेन च गात्रगतविकारविशेषोद्भेनापह्नुत्याभिधत्ते । सा चात्रापह्नुतिरसाध्व्या वक्तृत्वं पर्यालोच्यावगम्यते । अपह्नवस्य चालीकवस्त्वभिधा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नात्मकत्वादलीकस्य च सत्यार्थविपर्यासकारित्वादलीकेनार्थेन त्वसत्योक्तः स्वसिद्ध्यर्थत्वेनाक्षिप्यते । तेनात्र वक्तृविशेषपर्यालोचनया सत्यार्थे निष्ठया उपादानात्मिकाया लक्षणायाः प्रतिपत्तिः । न ह्यत्र वाक्यवाच्ययोः सामर्थ्यम् । साध्व्या वक्तृत्वे सति तयोरेवंविधार्थाक्षेपासमर्थत्वात् । वाक्यगतरूपविशेषपर्यालोचनया तु यत्र लाक्षणिकार्थपरिग्रहस्तत्रोदाहरणम्—

प्राप्तश्रीरेष कस्मात्पुनरपि मयि तं मन्थखेदं विदध्या-
न्निद्रामप्यस्य पूर्वामनलसमनसो नैव संभावयामि ।
सेतुं बध्नाति भूयः किमिति च सकलद्वीपनाथानुयात-
स्वय्यायाते वितर्कानिति दधत इवाभाति कम्पः पयोधेः॥ इति।

अत्र हि चाटुश्लोकेनोपश्लोक्यते यो नृपतिस्तदीयबलभरक्षोभ्यमाणस्वावस्थस्य समुद्रस्य यः कम्पोऽतिशयोक्त्योपवर्णितस्तस्य समुद्रकर्तृकवितर्कधारणहेतुत्वेनोत्प्रेक्षितमिति वितर्कान्दधत इवेति । तेच वितर्काः प्राप्तश्रीरित्यादिना भगवद्वासुदेवस्य व्यापारविशेषविषयाः । यावच्च तस्य नृपतेर्भगवद्वासुदेवता न समास्ति तावत्कथं तदीयेषु व्यापारविशेषेषु संशयः समुपजायते । अतोऽत्र यदेतद्बलभराक्रान्तत्वेन समुद्रस्याकम्पमानस्यापि कम्पमानार्थसादृश्यात्कम्पमानत्वमध्यवसितम्, तत्राध्यवसानगर्भगौणोपचारः । अकम्पमानस्यापि तस्य कम्पनार्थत्वेनाध्यवसितत्वात् । अत एव चेयं भेदेऽप्यभेद इत्येवमात्मिका अतिशयोक्तिः । विकल्पवशाद्यश्चेतनानां मूर्धकम्पो बाहुल्येन परिदृश्यते चेतनगतसंशयहेतुकमूर्धकम्पसादृश्यात् तद्भावोऽस्य कम्पस्योपचर्यते । एवं चात्राप्यध्यवसानगर्भो गौण उपचारः । इयमपि च विभिन्नयोरपि कम्पयोरभेदेनाध्यवसानात् भेदेऽप्यभेद इत्येवमात्मिका अतिशयोक्तिः । तन्निबन्धनैव चेयमुत्प्रेक्षा इति वितर्कान्दधत इवेति । अत्र हि कार्यभूतकम्पदर्शनात्करणभूतं वितर्कधारणं मिथ्याज्ञानस्वरूपयोत्प्रेक्षयोत्प्रेक्ष्यते । अत्रापि च वितर्कानिव धारयतोऽपि पयोधेः वितर्कधारणोपनिबन्धात् भेदेऽप्यभेद इत्येवमात्मिका अतिशयोक्तिर्गर्भीकृता । यदुक्तं उत्प्रेक्षा लक्षणे—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

"साम्यरूपविवक्षायां वाच्ये वाच्यात्मभिः पदैः ।
अतद्गुणक्रियायोगादुत्प्रेक्षातिशयान्विता" ॥

इति । संभाव्यमानस्य गुणक्रियायोगात् । तेनात्राप्यध्यवसानगर्भो गौण उपचारः । प्राप्तश्रीरित्यादिषु तु त्रिषु वितर्केषु भगवद्वासुदेवविषयेषु यथायोगं तत्तत्कार्यनिराकरणहेतुगर्भतया प्रवर्तमानेषु नृपतेर्भगवद्वासुदेवताक्षिप्ता । तेनात्रोपादानात्मिका लक्षणा । भगवद्वासुदेवरूपतया चात्र नृपतेरध्यवसानादध्यवसानगर्भो गौण उपचारः । एतच्चात्र सर्ववाक्योपात्तपदसमन्वयान्यथानुपपत्त्यावगम्यत इति वाक्यनिबन्धनात्र लक्षणा । वाच्यनिबन्धना तु यथा—

दुर्वारा मदनेषवो दिशि दिशि व्याजृम्भते माधवो
हृद्युन्मादकराः शशांकरुचयश्चेतोहराः कोकिलाः ।
उत्तुङ्गस्तनभारदुर्धरमिदं प्रत्यग्रमन्यद्वयः
सोढव्याः सखि सांप्रतं कथममी पञ्चाग्नयो दुःसहाः ॥

इत्यत्र हि स्मरशरप्रभृतीनां पञ्चानामध्यारोपितवह्निभावानामसह्यत्वं वाक्यार्थीभूतम् । अतस्तस्य वाच्यता । तत्पर्यालोचनसामर्थ्याच्च विप्रलंभशृङ्गारस्याक्षेप इत्युपादानात्मिका लक्षणा वाच्यनिबन्धना । नह्यत्र वक्तृस्वभावपरिशीलनस्य शब्दरहितस्योपयोगः । नापि च वाक्ये पदानां विप्रलम्भशृङ्गाराक्षेपमन्तरेणान्वयोपपत्तिः । वाच्यस्वरूपविचारेण तत्र विप्रलम्भशृङ्गाराक्षेपादुपादानात्मिका लक्षणा वाच्यनिबन्धना । विप्रलम्भशृङ्गारस्य चाक्षिप्यमाणस्यापि वाच्यापेक्षया प्राधान्यम् । सहृदयहृदयाह्लादहेतुतया-प्राधान्येनाक्षेपात् । हृद्युन्मादकरा इत्यत्र सत्यपि शशाङ्करुचीनां स्त्रीत्वे हेतुताच्छील्यानुलोम्यानामविवक्षितत्वाट्टप्रत्ययाभावेनाच्प्रत्ययान्तत्वात् ईकाराभावः । पूर्वं चात्र कर्मसंबन्धस्याविवक्षणात् अच्प्रत्ययस्याभाव इत्यप्रत्ययः 'शिवशमरिष्टस्य करे' इतिवत् । अत एव हेत्वादिविवक्षायामपि टप्रत्ययाभावाददोषः । एवं वक्तृवाक्यवाच्यानामेकैकसमाश्रयेण येऽत्र त्रयो भेदा भवन्ति ते तावदुदाहृताः । अन्येऽपि च ये वक्तारं वाक्यवाच्ययोरन्यतरेण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संयोज्य तथा वाक्यं वाच्येन सह समुच्चित्य द्विकभेदास्त्रयः, तथा त्रिकभेदाश्च वक्तृवाक्यवाच्यानां त्रयाणामपि परस्परसंयोजनया चैक इत्येवं चत्वारो भेदा दृश्यन्ते, ते स्वबुद्ध्या षट्प्रकारलक्षणाविषयत्वेन मनीषिभिरुदाहार्याः। तेषां च देशकालावस्थास्वालक्षण्यगतसमस्तव्यस्तभेदप्रपञ्चयोजना लक्ष्ये अन्वेषणीया।

तदेवं चतुर्विधो मुख्योऽर्थो निर्णीतः। लक्षणया तु षट्प्रकारा उक्ताः। इदानीमभिहितान्वयोऽन्विताभिधानं तत्समुच्चयस्तदुभयाभावश्चेत्येवं ये चत्वारः पक्षास्तेषु लक्षणायाः कक्षाविभागं दर्शयितुमाह—

अन्वयेऽभिहितानां सा वाच्यत्वादूर्ध्वमिष्यते ॥ ७ ॥
अन्वितानां तु वाच्यत्वे वाच्यत्वस्य पुरः स्थिता।
द्वये द्वयमखण्डे तु वाक्यार्थपरमार्थतः ॥ ८ ॥
नास्त्यसौ कल्पितेऽर्थे तु पूर्ववत्प्रविभज्यते।

इह केषांचिदन्वयव्यतिरेकावसेयसामान्यभूतस्वार्थमात्रविश्रान्तेषु पदेषु पदार्थाकाङ्क्षासंनिधियोग्यतामहिम्ना वाक्यार्थस्यानभिधेयभूतस्य हर्षशोकादिवदवसेयत्वमेव। यदाहि ब्राह्मण पुत्रस्ते जातः, ब्राह्मण कन्या ते गर्भिणीतीति यथाक्रमं पुत्रजन्मकन्यागर्भिणीत्वनिमित्तौ हर्षशोकौ स्वशब्देनानभिहितावपि शब्दाभिधेयभूतवस्तुसामर्थ्यादाक्षिप्येते। एवं वाक्यार्थस्यानभिधेयभूतस्यैव पदार्थाक्षेप्यत्वं द्रष्टव्यम्। एषां चैवंवादिनां मतेनार्थानामभिहितानामुत्तरकालं परस्परान्वयादभिहितान्वयः। अपरे त्वाहुः—वृद्धव्यवहारात् शब्दार्थसंबन्धावसायः। स च वृद्धव्यवहारः प्रवृत्तिनिवृत्तिरूपः। प्रवृत्तिनिवृत्ती च विशिष्टार्थनिष्ठे। अतो विशिष्ट एवार्थे पदानां संबन्धावधृतिः। ततश्च विशिष्टा एव पदार्था न तु पदार्थानां वैशिष्ट्यम्। एवं च परस्परान्वितानां वाक्यार्थरूपतापन्नानां तत्तत्सामान्यावच्छादितत्वेन गृहीतस्ववाचकसंबन्धानां पदैः प्रत्यायनादन्विताभिधानमिति। अन्येषां तु मते पदानां तत्तत्सामान्यभूतो वाच्योऽर्थः। वाक्यस्य तु परस्परान्विताः पदार्था इति पदापेक्षयाभिहितान्वयः, वाक्यापेक्षया त्वन्विताभिधानम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवं चैतयोरभिहितान्वयान्विताभिधानयोः समुच्चय इति । अखण्डवाक्यवाक्यार्थवादिनस्त्वाहुः—विशिष्टस्य वस्तुनो वाक्यार्थत्वेऽभ्युपगम्यमाने विशेषस्यानन्वितत्वेन तद्विपरीतसामान्यविरुद्धत्वान्न परमार्थस्वभावसामान्यभूतार्थवच्छादितरूपतया विशेषाणां स्ववाचकैः संबन्धग्रहणमुपपद्यते । अतः परमार्थतो वाक्यवाक्यार्थयोरखण्डत्वान्नाभिहितान्वयो नाप्यन्विताभिधानम् । न च तत्समुच्चयो युज्यते । पदार्थानामविद्यमानत्वात् । कल्पितपदार्थनिष्ठत्वेन उभयमपि व्यस्तसमस्तरूपतया कल्पते इति । तत्र च यदा तावदभिहितान्वयस्तदा स्ववाचकैरभिहितानां पदार्थानामभिहितोत्तरकालमाकाङ्क्षायोग्यतासंनिधिमाहात्म्याद्विशेषणविशेष्यभावात्मके परस्परसमन्वये सति सा लक्षणा पदार्थानां सामान्यभूतानां यद्वाच्यत्वं तस्मादूर्ध्वं वाक्यार्थे पदार्थसामर्थ्यादवगम्यमाने सतीष्यते । अन्विताभिधानपक्षे त्वन्वितानां विशिष्टानामेव पदार्थानां वाच्यत्वं अभिधेयत्वं, नतु पदार्थानां सामान्यभूतत्वेनाभिहितानां वैशिष्ट्यम् । तत्र विशिष्यमाणानां वस्तूनां पदार्थत्वं तावन्न घटते । यावत्सकलवाक्यार्थानुयायितया प्रतिपन्नस्याव्यभिचरितस्ववाचकसंबन्धस्य सामान्यरूपस्य निमित्तभूतस्यार्थस्य संप्रत्यये सति तत्तद्वाक्यार्थविषयतया यथाविषयं षट्प्रकारा लक्षणा नाविर्भवति । अतोऽन्विताभिधाने विशिष्टानां पदार्थानां वाक्यार्थस्वभावानां यद्वाच्यत्वं तस्य पुरस्तस्मात् पूर्वनिमित्तावस्थायां लक्षणावस्थिता । अभिहितान्वयान्विताभिधानसमुच्चये तु पूर्वोदितन्यायद्वितयसंकलनया पदापेक्षया वाच्यत्वोत्तरकालभाविनी लक्षणा भवति । वाक्यार्थोत्तरकालं तस्याः पूर्वमवस्थानम् । तदिदमुक्तं द्वये द्वयमिति । द्वयेऽभिहितान्वयान्विताभिधानसमुच्चयात्मके द्वयं वाच्यत्वात् ऊर्ध्वं प्रागभावश्च लक्षणाया इत्यर्थः । अखण्डे तु वाक्यार्थे असौ लक्षणा परमार्थेन नास्ति । भिन्नानां पदार्थानां परमार्थतोऽभिधेयभावस्यानुपपद्यमानत्वात् तदाश्रितत्वाच्च लक्षणायाः कल्पितपदार्थसंश्रयेण तु सा लक्षणा । यथारुचि पूर्ववदभिहितान्वयान्विताभिधानतत्समुच्चयकल्पनया विभक्तन्यग्भागे निवेश्य परस्परस्य देशकालावच्छेदेनाशेषव्यवहर्तृनिष्ठतया रूढत्वात् । एवमभिहितान्वयादिपक्षचतुष्टये लक्षणायाः कक्षाविभागो निरूपितः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमभिहितान्वयादिपक्षचतुष्टये लक्षणाया यत्र मुख्यार्थासंभवस्तत्र मुख्यार्थासन्नवस्तुविषयां सति प्रयोजने प्रवृत्तिमुपदर्शयितुमाह—

मुख्यार्थासंभवात्सेयं मुख्यार्थासत्तिहेतुका ॥ ९ ॥
रूढेः प्रयोजनाद्वापि व्यवहारे विलोक्यते ॥

याचेयं षट्प्रकारा लक्षणा पूर्वमुक्ता सा मुख्यस्यार्थस्य प्रमाणान्तरबाधितत्वेनासंभवाल्लक्ष्यमाणस्य चार्थस्य मुख्यार्थं प्रत्यासन्नत्वात् सान्तरार्थग्रहणस्य च सप्रयोजनत्वादित्येवंविधकारणत्रितयात्मकसामग्रीसमाश्रयणेन वृद्धव्यवहारे परिदृश्यते । यच्च तन्मुख्यार्थासन्तत्वं तत्पञ्चप्रकारतयाचार्यभर्तृमित्रेण प्रदर्शितम्–'अभिधेयेन संबन्धात्सादृश्यात्समवायतः । वैपरीत्यात्क्रियायोगाल्लक्षणा पञ्चधा मता ॥' इति श्लोकेन । तेन प्रयोजनस्यापि द्वैविध्यम् । किंचिद्धि सान्तरार्थपरिग्रहे प्रयोजनमनादिवृद्धव्यवहारप्रसिद्ध्यनुसरणात्मकत्वात् रूढ्यनुवृत्तिस्वभावं, यथा द्विरेफादौ । द्विरेफशब्देन हि रेफद्वितययोगित्वेन भ्रमरशब्दलक्षणाद्वारेण रूढ्यनुवृत्तिरेव क्रियते । अपरं तु रूढ्यनुसरणात्मकं यत्प्रयोजनमुक्तं तद्व्यतिरिक्तवस्त्वन्तरगतस्य संविज्ञानपदस्य रूपविशेषस्य प्रतिपादनं नाम, यथा पूर्वमुदाहृतं रामोऽस्मीति । एतच्च प्रयोजनद्वितयं मुख्यार्थासंभवे सति मुख्यार्थप्रत्यासन्नतया पूर्वोपदर्शितेन संबन्धपञ्चकेनावगम्यमाने लाक्षणिकेऽर्थे यथाविषयमनुसर्तव्यम् । तत्र संबन्धलक्षणा यथा गङ्गायां घोष इति । अत्र हि गङ्गाशब्दाभिधेयस्य स्रोतोविशेषस्य घोषाधिकरणत्वानुपपत्त्या मुख्यशब्दार्थबाधे सति योऽसौ समीपसमीपिभावात्मकः संबन्धस्तदाश्रयेण तटं लक्षयति । अत्र च लक्षणायाः प्रयोजनं तटस्य गङ्गात्वैकार्थसमवेताऽसंविज्ञानपदपुण्यत्वमनोहरत्वादिप्रतिपादनम् । नहि तत्पुण्यत्वमनोहरत्वादि स्वशब्दैः स्प्रष्टुं शक्यते । अव्याप्त्यतिव्याप्तिप्रसङ्गात् । सादृश्यलक्षणायामुदाहरणम्—

'भ्रमर, भ्रमता दिगन्तराणि क्वचिदासादितमीक्षितं श्रुतं वा ।
वद सत्यमपास्य पक्षपातं यदि जातीकुसुमानुकारि पुष्पम्' ॥

अत्रहि भ्रमरपुष्पशब्दौ संबोधनान्यथानुपपत्त्या बाधितमुख्यार्थावभिधे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यसादृश्यात्तद्गतगुणसदृशगुणप्रयुक्तमर्थान्तरं लक्षणयावगमयतः । प्रयोजनं चात्र भ्रमरत्वपुष्पत्वैकार्थसमवेतक्रियागुणसदृशानामसंविज्ञानपदानां क्रियागुणानां प्रतिपादनम् । समवायतो लक्षणा यथा छत्रिणो यान्तीति । अत्र बहुवचनप्रयोगान्मुख्यशब्दार्थबाधः । नह्येकस्मिंश्छत्रिणि बहुवचनस्य प्रयोग उपपद्यते । अतोऽत्र गमनलक्षणायां क्रियायां छत्रिणा सह योऽसौ छत्रशून्यानां समवायः साहचर्यं तद्बशात् छत्रिशब्देन छत्रशून्या अपि लक्षणयावगम्यन्ते । प्रयोजनं चात्र छत्रशून्यानां सर्वात्मना छत्रोपेतस्वाम्यनुयायितया प्रतिपादनम् । वैपरीत्याल्लक्षणा यथा, भद्रमुख इति । अत्र हि भद्रमुखशब्दस्याभद्रमुखे प्रयोगात्स्वार्थबाधः । अतोऽसौ वाच्यभूतभद्रमुखत्वविपरीतत्वादभद्रमुखत्वं विपरीतनिबन्धनया लक्षणया प्रत्याययति । अत्र च लक्षणाप्रयोजनं गुणासत्यार्थप्रतिपत्तिः । गुणो ह्यसत्योऽर्थस्तत्तदभिप्रायवशेन प्रायेण प्रयोक्तृभिः प्रतिपाद्यते । क्रियायोगाल्लक्षणायामुदाहरणं यथा "महति समरे शत्रुघ्नस्त्वमि"ति । अत्र हि अशत्रुघ्ने शत्रुघ्नशब्दप्रयोगान्मुख्यशब्दार्थबाधः । शत्रुघ्नशब्दश्चाशत्रुघ्ने शत्रुहननक्रियाकर्तृत्वयोगाल्लक्षणयोक्तः । प्रयोजनं चात्र शत्रुघ्नशब्दाभिधेये नृपतिरूपताप्रतिपादनम् । तथाच—

'पृथुरसि गुणैः कीर्त्या रामो नलो भरतो भवान्
महति समरे शत्रुघ्नस्त्वं क्षितौ जनकः स्थितेः ।
इति सुचरितैः ख्यातिं[1] बिभ्रच्चिरंतनभूभृतां
कथमसि न मांधाता देव त्रिलोकविजय्यपि ॥

इति शत्रुघ्नरूपतया नृपतित्वमुपश्लोक्यमानमस्य राज्ञो वर्णितम् । तदेवं निबन्धनत्रितयसमुद्भवता लक्षणात्रयस्योक्ता ।

इदानीं पञ्चविधसंबन्धनिबन्धनायामासत्तौ पूर्वोपवर्णितायां क्वचिद्वाच्यस्यातितिरस्कारः क्वचिद्विवक्षितत्वं क्वचिच्चाविवक्षितत्वमित्येवंविधं त्रयं यत्सहृदयैरुपदर्शितं तस्य विषयविभागमुपदर्शयितुमाह—

---

१ मूर्तिं इति पाठान्तरम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सादृश्ये वैपरीत्ये च वाच्यस्यातितिरस्क्रिया ॥ १० ॥
विवक्षा चाविवक्षा च संबन्धसमवाययोः ।
उपादाने विवक्षात्र लक्षणे त्वविवक्षणम् ॥ ११ ॥
तिरस्क्रिया क्रियायोगे क्वचित्तद्विपरीतता ।

अभिधेयेन संबन्धादित्यत्र यदासंत्तिरूपं पञ्चकमुक्तं तत्र सादृश्ये वैपरीत्ये च वाच्यस्यात्यन्तं तिरस्कारः । तथाहि—सादृश्यनिबन्धनायां लक्षणायामुपमानवाचिनः पदस्योपमेयपरत्वमुपमानात्मकं वाच्यमत्यन्तं तिरस्क्रियते । यथोपदर्शितं "स्निग्धश्यामलकान्तिलिप्तेति" "पयोदसुहृदामिति" च। अत्र हि लिप्तसुहृच्छब्दयोः स्वार्थोपमितवस्तुपरत्वात् स्वार्थस्यात्यन्तं कार्येऽनन्वितत्वम् । वैपरीत्यसमाश्रयायामपि तस्यामर्थान्तरस्य वाच्यविपरीतस्योपादेयत्वाद्वाच्यस्यात्यन्तं तिरस्कारः । यथा भद्रमुखेति । अत्रहि भद्रमुखत्वमभद्रमुखत्वादत्यन्तं तिरस्कृतम् । एवं सादृश्यवैपरीत्ययोरत्यन्ततिरस्कृतवाच्यता । संबन्धसमवाययोस्तु वाच्यस्य विवक्षितत्वाविवक्षितत्वेन तस्यात्यन्तं तिरस्कारः । तत्र ह्युपादानात्मिकायां लक्षणायामुपादाने वाच्यविवक्षायां वाच्यस्य विवक्षितत्वम् । तथाहि—तत्र विवक्षितान्यपरता सहृदयैः काव्यवर्त्मनि निरूपिता । लक्षणे तु वाच्यस्याविवक्षितार्थान्तरसंक्रमितत्वात् । तथाहि यत्रार्थान्तरसंक्रमितवाच्यता । तत्र संबन्धनिबन्धनायां लक्षणायामुपादाने वाच्यविवक्षायामुदाहरणं, पीनो देवदत्तो दिवा न भुङ्क्ते इति । अत्रहि दिनाधिकरणभोजनाभावविशिष्टतया पीनत्वलक्षणं कार्यं विवक्षितमेव सत्स्वसिद्ध्यर्थत्वेन संबन्धनिबन्धनायां लक्षणायां रात्रिभोजनात्मकं कारणमाक्षिपति । समवायनिबन्धनायां तस्यामुपादाने वाच्यस्य विवक्षितत्वं यथा छत्रिणो यान्तीति । अत्र हि यदा छत्री बहुत्वोपेतत्वात्स्वगतबहुत्वान्वयसंसिद्ध्यर्थत्वेन छत्रशून्यानप्याक्षिपति तदा समवायनिबन्धने छत्रशून्यानामुपादाने क्रियमाणे वाच्यश्छत्री विवक्षितः । तदेवं संबन्धसमवायनिबन्धनयोरुपादानात्मिकयोर्लक्षणयोर्वाच्यस्य विवक्षितत्वमुक्तम् । लक्षणात्मिकयोस्तु तयोर्वाच्यस्य विवक्षा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न त्वत्यन्तं तिरस्कारः । लक्ष्यमाणद्वारेण कथंचित्कार्येऽन्वितत्वात् । तत्र संबन्धनिबन्धनायां लक्षणायामविवक्षितवाच्यत्व उदाहरणम् रामोऽस्मीति । अत्रहि रामशब्दवाच्यं दाशरथिरूपं व्यङ्ग्यं धर्मान्तरपरिणतत्वात् स्वपरत्वेनानुपात्तं तस्मादविवक्षितं न त्वत्यन्तं तिरस्कृतम् । व्यङ्ग्यधर्मद्वारेण वाक्यार्थे कथंचिदन्वितत्वात् । एवं गङ्गायां घोष इत्यादावप्युन्नेयम् । समवायसंबन्धनिबन्धनायां तु लक्षणायामविवक्षितवाच्यता छत्रिणो यान्तीत्यत्रैवोदाहार्या । तथाहि, यदा छत्रित्वं बहुत्वान्वयान्यथानुपपत्त्या समुदायपरतयोपादीयते तदा समुदायस्य विवक्षितत्वाद्वाच्यस्याविवक्षा । एवमपि च समुदायान्तरभूतत्वात्समुदायद्वारेण छत्रिणोऽपि क्रियान्वयः सुलभ एव । अत एव चात्र वाच्यस्य नात्यन्तं तिरस्कारः । समुदायरूपान्तर्भूतत्वेन क्रियान्वितत्वात् । तदेवं संबन्धसमवायनिबन्धनयोर्लक्षणयोर्वाच्यस्य विवक्षितत्वमविवक्षितत्वं च न त्वत्यन्ततिरस्कार इति स्थितम् । क्रियायोगनिबन्धनायां तु लक्षणायां शब्दगतावयवशक्तयनुसरणे शब्दशक्तिमूलता लक्ष्यमाणस्यार्थस्य । तत्र च वाच्यस्यार्थस्य तिरस्क्रिया यथा पुरुषः पुरुष इति । अत्र ह्येकेन पुरुषशब्देन विशिष्टजातीयस्यार्थस्योपात्तत्वादपरः पुरुषशब्दः स्ववाच्यव्यतिरेकेणैव क्रियायोगनिबन्धनया लक्षणया पुनरतिशयितृत्वमुपादत्ते । यत्र तु निमित्तसद्भावाद्वाच्येऽर्थे विवक्षिते एव तस्यार्थान्तरस्य शब्दशक्त्यन्तरमूलतया व्यवस्थितस्याव्यवायः क्रियते तत्र तद्विपरीतता वाच्यार्थतिरस्क्रियावैपरीत्यम् । न खल्वत्र वाच्यस्यार्थस्य तिरस्क्रिया अपितु विवक्षितमेव यथा 'महति समरे शत्रुघ्नस्त्व'मिति । अत्रहि शत्रुघ्नशब्दः शत्रुहननक्रियायाः कर्तृकत्वं क्रियायोगनिबन्धनया लक्षणयावगमयन्नपि स्वार्थं दाशरथिमुपमानतयापि प्रतिपादयति । तेन तस्य विवक्षितस्य स्वार्थतापि । यद्यपि चोपमेयपरत्वेनोपमानस्योपादानादेवंविधे विषयेऽत्यन्ततिरस्कृतवाच्यता सहृदयैरङ्गीक्रियते, तथापि क्रियायोगनिबन्धनलक्षणावसरे तावद्वाच्यस्योपमानत्वेनाङ्गीकृतत्वादतिरस्कृतवाच्यतापि भवति । तदेवं क्रियायोगनिबन्धनायामन्तःसंक्रान्तनानार्थवशतः क्वचिद्वाच्यं तिर-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्क्रियते क्वचित्तु विवक्ष्यत इति स्थितम् । एतच्च सर्वं बहुवक्तव्यत्वादिह न निरूप्यते । लक्षणामार्गावगाहित्वं तु ध्वनेः सहृदयैर्नूतनतयोपवर्णितस्य विद्यत इति दिशमुन्मीलयितुमिदमत्रोक्तम् । एतच्च विद्वद्भिः कुशाग्रीयया बुद्ध्या निरूपणीयम् । न तु झगित्येवासूयितव्यमित्यलमतिप्रसंगेन । तदेवं वाच्यस्य तिरस्कृतविवक्षायां विषयविभागो निरूपितः ।

इदानीं सकलशब्दविभागात्मकस्य शब्दतत्त्वस्य यदा शब्दार्थसंबन्धत्रितयरूपतया रज्जुसर्पतया विवर्तमानत्वं तदैतदभिधावृत्तं दशविधव्यवहारोपारोहितयोपपद्यते, नतु संहृतार्थवाक्तत्वविषयतयेति दर्शयितुमाह—

विवर्तमानं वाक्तत्वं दशधैवं विलोक्यते ।
संहृतक्रमभेदे तु तस्मिंस्तेषां कुतो गतिः ॥ १२ ॥

सकलशब्दाविभागात्मनः शब्दतत्त्वस्य प्रमातृप्रमाणप्रमेयप्रमितिरूपेण प्रकारचतुष्टयेन प्रत्येकं वाच्यवाचकतत्संबन्धप्रपञ्चभाजो रज्जुसर्पवद्विवर्तमानस्य निरूपितैवंविधदशविधाभिधावृत्तसंबन्धित्वम्[1] प्रत्यस्तमितसकलविकल्पोल्लेखोपप्लवत्वे तु क्रमभेदसंहारेण तस्मिन् वाक्तत्वे विवर्तमाने तेषां दशानामभिधावृत्तानां कुतो गतिः । नैव प्रसर इत्यर्थः ।

इदानीं प्रकरणार्थमुपसंहरति—

इत्येतदभिधावृत्तं दशधात्र विवेचितम् ।

मुख्यस्याभिधावृत्तस्य प्रकाराश्चत्वारो लाक्षिणकस्य तु षडित्येवं दशप्रकारमभिधावृत्तमत्र विवेचितम् ।

अधुना फलमेतस्य दर्शयति—

पदवाक्यप्रमाणेषु तदेतत्प्रतिबिम्बितम् ॥ १३ ॥
यो योजयति साहित्ये तस्य वाणी प्रसीदति ।

पदावगतिहेतुत्वात्पदं व्याकरणम् । वाक्यसमन्वयावसायहेतुत्वाद्वाक्यं मीमांसा । प्रमाणप्रतिपत्तिकारित्वात्प्रमाणं तर्कः । एतेषु पदवाक्यप्रमाण-

---

१ प्रमाणपरिकरत्वात्–इति पाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शास्त्रेषु चतुर्वर्गोपयोगिसर्वविद्याधिगमोपायभूतेषु त्रिषु प्रविभिद्यमानेषु संक्रान्तानन्तरनिरूपितस्वरूपप्रतिबिम्बं दशविधमभिधावृत्तं यः साहित्यादौ सकललोकव्यवहारदर्पणप्रख्ये संचारयति स वाचि क्रमेण प्रसीदन्त्यां वागीश्वरो भवति । दशविधेनानेनाभिधावृत्तेन समग्रस्य वाक्परिस्पन्दस्य व्याप्तत्वादनेन व्याकरणमीमांसातर्कसाहित्यात्मकेषु चतुर्षु शास्त्रेषूपयोगात् तद्द्वारेण च सर्वासु विद्यासु सकलव्यवहारमूलभूतासु प्रसारणादस्य दशविधस्याभिधावृत्तस्य सकलव्यवहारव्यापित्वमाख्यातम् ।

भट्टकल्लटपुत्रेण मुकुलेन निरूपिता ।
सूरिप्रबोधनायेयमभिधावृत्तिमातृका ॥ २५ ॥

इति शारदाचरणरजःकणपवित्रितस्थलवास्तव्यश्रीभट्टकल्लटात्मज-
भट्टमुकुलविरचिता अभिधावृत्तिमातृका समाप्ता ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीः ।

श्रीराजानकमम्मटाचार्यविरचितः ।

शब्दव्यापारविचारः ।

इह हेयोपादेयानां हानोपादाने प्रमाणादेव । तच्च निश्चयात्मतया प्रामाण्यं भजते । निश्चयश्च शब्दसाहित्येनार्थं विषयीकरोति । शब्दस्य चार्थप्रतीतिप्रतिपत्तिलक्षणकार्यान्यथानुपपत्त्या कारकत्वात्कल्प्यमानो व्यापारोऽभिधादिशब्दप्रतिपाद्यो नानाप्रकार इति तत्परीक्षार्थं शब्दव्यापारविचारात्मकं प्रकरणमिदमारभ्यते । व्यापारश्च शृङ्गग्राहिकया दर्शयितुं न युज्यत इति विषयमुखेन प्रदर्श्यते—

जातिः क्रिया गुणः संज्ञा वाच्योऽर्थः समितध्वनिः ।

अगृहीतसङ्केतस्य शब्दस्यार्थप्रतिपत्तेरभावात्सङ्केतसहाय एव शब्दोऽर्थं प्रतिपादयति । तेन समितः सङ्केतितो ध्वनिः शब्दो यत्र सोऽर्थः । पूर्वमुपलभ्यत्वान्नतु विश्रान्तिधामत्वान्मुख्य इति प्रसिद्धो वाच्योऽभिधेयोऽर्थः । तथा चाह—**जातिरित्यादि** । इह यद्यपि प्रवृत्तिनिवृत्तिविषयो व्यक्तिरेव, तथाप्यानन्त्याद्व्यभिचाराच्च तत्र सङ्केतः कर्तुं न पार्यत इति गौः शुक्लश्चलो डित्थ इत्यादीनामेकार्थत्वं मा प्रसाङ्क्षीदिति च शब्दानामुपाधावेव सङ्केतः । उपाधिश्च वस्तुधर्मो वक्तृयदृच्छासंनिवेशितश्च । आद्यः सिद्धः साध्यश्च । सिद्धोऽपि द्विविधः पदार्थस्य प्राणप्रदो विशेषाधानहेतुश्च । आद्यो जातिः । उक्तं हि **वाक्यपदीये**—"गौर्हि स्वरूपेण न गौः, नाप्यगौः, गोत्वाभिसंबन्धात्तु गौः" इति । द्वितीयो गुणः । शुक्लादिना हि लब्धसत्ताकं वस्तु विशेष्यते । साध्यः पूर्वापरीभूतावयवः क्रियारूपः । डित्थादिशब्दानामन्त्यबुद्धिनिर्ग्राह्यं संहृतक्रमं स्वरूपं वक्ता यदृच्छया डित्थादिष्वर्थेषूपाधितया संनिवेश्यते इति च संज्ञारूपो यदृच्छात्मक इति । गौः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शुक्लश्चलो डित्थ इत्यादौ चतुष्टयी शब्दानां प्रवृत्तिर्भाष्ये कथिता । परमाणुत्वादीनां तु गुणमध्यपाठात्पारिभाषिकं गुणत्वम् । ननु पयःशङ्खाद्याश्रयीभूतेषु शुक्लादिगुणेषु यद्वशेन शुक्लः शुक्ल इत्यभिन्नावभिधानप्रत्ययौ स्तस्तच्छुक्लत्वादिसामान्यम् । गुडतण्डुलादिपाकेषु एवमेव पाकत्वादिकम् । शुकसारिकाद्युदीरितेषु डित्थादिशब्देषु च डित्थादिशब्दत्वं, प्रतिक्षणं भिद्यमाने वा डित्थाद्यर्थे डित्थादित्वमस्तीति कथं चतुष्टयी शब्दानां प्रवृत्तिः । उच्यते । संस्थानावस्थानप्रमाणवर्णैर्भेदेऽपि व्यक्तीनां शावलेयो गौः धावलेयो गौरित्याद्येकप्रत्ययहेतुत्वं जातेरेव । हंसहारादीनां घृतगुडादीनां शुकसारिकाद्युदीरितडित्थादिशब्दानां नानावस्थडित्थाद्यर्थानां च भेदेऽपि हंसः शुक्लः, हारः शुक्लः, घृतं पच्यते, गुडं पच्यते, डित्थशब्दो डित्थशब्दः, डित्थो डित्थ इत्येकाकारावगतिनिबन्धनत्वादेकरूपत्वमेव गुणक्रियायदृच्छानामिति नैतासां भिन्नेष्वभिन्नाभिधानप्रत्ययहेतुर्जातिर्घटत इति चत्वार्येव शब्दप्रवृत्तिनिमित्तानि ॥

अपरमाह—

तद्बाधे रूढितोऽर्थाद्वा लक्षणीयस्तदन्वितः ॥ १ ॥

शब्दे कुशल इत्यादौ दर्भग्रहणाद्ययोगात् गङ्गायां घोष इत्यादौ च गङ्गादीनां च घोषाधिकरणतासंभवात् मुख्यार्थस्य बाधः, रूढितः प्रसिद्धेः तथा गङ्गातट इत्यादेर्येषां न तथा प्रतिपत्तिस्तेषां पावनत्वादीनां तथाप्रतिपादनात्मना प्रयोजनेन । तेन मुख्येनार्थेनान्वितो लक्षणीयो लक्षणाव्यापारगोचरः । संबन्धश्चात्र विवेकत्वादिः सामीप्यादिश्च । एवं वाच्यवाचकार्थनिष्ठौ व्यापारावभिधालक्षणे ।

स्वसिद्धये पराक्षेपः परार्थं स्वसमर्पणम् ।
उपादानं लक्षणं चेत्युक्ता शुद्धैव सा द्विधा ॥ २ ॥

कुन्तान्प्रवेशय, यष्टीः प्रवेशयेत्यादौ कुन्तादिभिरात्मनः प्रवेशसिद्धये स्वसंयोगिनः पुरुषा आक्षिप्यन्ते । तत उपादानेनेयं लक्षणा । "गौरनुबन्ध्यः" इत्यादौ श्रुतिचोदितमनुबन्धनं कथं मे स्यादिति जात्या व्यक्तिरा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षिप्यते न तु शब्देनोच्यते । "विशेष्यं नाभिधा गच्छेत्क्षीणशक्तिर्विशेषणे" इति न्यायादुपादानलक्षणा नोदाहर्तव्या । न ह्यत्र प्रयोजनमस्ति न वा रूढिः । व्यक्तयविनाभावात्तु जात्या व्यक्तिराक्षिप्यते, यथा क्रियतामित्यत्र कर्ता, कुर्वित्यत्र कर्म, प्रविश पिण्डीमित्यादौ गृहं, भक्षयेत्यादि च । पीनो देवदत्तो दिवा न भुङ्क्ते इत्यत्र च रात्रिभोजनं न लक्ष्यते । श्रुतार्थापत्तेरर्थापत्तेर्वा तस्य विषयत्वात् । गङ्गायां घोष इत्यत्र तटस्य घोषाधिकरणतायाः सिद्धये गङ्गाशब्दः स्वार्थमर्पयतीत्येवमादौ लक्षणेनैषा लक्षणा । उभयरूपा चेयं शुद्धा, उपचारेणामिश्रत्वात् । अनयोर्भेदयोर्लक्ष्यस्य लक्षकस्य च न भेदरूपं तटस्थत्वम् । तटादीनां गङ्गादिशब्दैः प्रतिपादने तत्त्वप्रतिपत्तौ हि प्रतिपिपादयिषितप्रयोजनसंप्रत्ययः । गङ्गासंबन्धमात्रप्रतीतौ तु गङ्गातटे घोष इति मुख्यशब्दाभिधानाल्लक्षणायाः को भेदः ॥

सारोपान्या तु यत्रोक्तौ विषयी विषयस्तथा ।

आरोप्यमाण आरोपविषयश्च यत्रानपह्नुतभेदौ सामानाधिकरण्येन निर्दिश्येते सा लक्षणा सारोपा ।

विषय्यन्तः कृतेऽन्यस्मिन्सा स्यात्साध्यवसानिका ॥ ३ ॥

विषयिणारोप्यमाणेनान्तःकृते निगीर्णेऽन्यस्मिन्नारोपविषये सति साध्यवसाना ।

भेदाविमौ च सादृश्यात्संबन्धान्तरतस्तथा ।
गौणौ शुद्धौ च विज्ञेयौ

इमावारोपाध्यवसानरूपौ सादृश्यहेतू गौर्वाहीक इत्यत्र गौरयमित्यत्र च । अत्र स्वार्थसहचारिणो गुणा जाड्यमान्द्यादयो लक्ष्यमाणा अपि गोशब्दस्य परार्थाभिधानं प्रति निमित्तत्वमुपयान्तीति केचित् । स्वार्थसहचारिगुणाभेदेन परार्थगता गुणा एव लक्ष्यन्ते न तु परार्थोऽभिधीयत इत्यपरे । साधारणगुणाश्रयणेन परार्थ एव लक्ष्यत इत्यन्ये । उक्तं चान्यत्र —"अभिधेयाविनाभूतप्रतीतिर्लक्षणोच्यते । लक्ष्यमाणगुणैर्योगाद्वृत्तेरिष्टा तु गौणता ॥" इति । अविनाभावोऽत्र संबन्धमात्रं न तु नान्तरीयकत्वम् । तत्त्वे हि मञ्चाः क्रोशन्तीत्यादौ लक्षणा न स्यात् । अविनाभावे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चाक्षेपेणैव सिद्धेर्लक्षणाया नोपयोग इत्युक्तम् । येन गोगतजाड्यमान्द्यादिसदृशजाड्यमान्द्येत्याद्युच्यते तेन गुणाभेदाभ्युपगमे गुणजातिप्रसङ्गाच्चतुष्टयी शब्दानां प्रवृत्तिरुक्ता व्याहन्येत ।

'आयुर्घृतम्', 'आयुरेवेदम्' इत्यादौ सादृश्यादन्यः कार्यकारणभावादिः परः संबन्धः । एवमादौ च कार्यकारणभावादिलक्षणपूर्वे आरोपाध्यवसाने । अत्र गौणभेदयोर्भेदेऽपि तादूप्यप्रतीतिः सर्वथैवाभेदावगमश्च प्रयोजनम् । शुद्धभेदयोस्त्वन्यवैलक्षण्येनाव्यभिचारेण च कार्यकारित्वादि । क्वचित्तादर्थ्यादुपचारः, यथा इन्द्रार्था स्थूणा इन्द्रः । क्वचित्स्वस्वामिभावात्, यथा राजकीयः पुरुषो राजा । क्वचिदवयवावयविभावात्, यथा अग्रहस्त इत्यत्राग्रमात्रावयवे हस्तः । क्वचित्तात्कर्म्यात्, यथा अतक्षा तक्षा ।

लक्षणा तेन षड्विधा ॥ ४ ॥

आद्यभेदाभ्यां सह । सा च "वक्तुर्वाक्यस्य वाच्यस्य रूपभेदाद्विभिद्यते" । तत्र वक्तृस्वरूपपर्यालोचनात्सा यथा—

उपकृतं बहु तत्र किमुच्यते सुजनता प्रथिता भवता परम् ।
विदधदीदृशमेव सदा सखे सुखितमास्व ततः शरदां शतम् ॥

बहुभिरपकारैस्ताप्यमानस्य कस्यचिदुक्तिरियम् । अतो वक्तृमहिम्ना मूर्खे बृहस्पतिशब्देन मूर्खत्वमिवापकारिणि दुर्जनत्वाद्यत्र लक्ष्यते ।

वाक्यविशेषावधारणाद्यथा—

धन्यासि या कथयसि प्रियसङ्गमेऽपि
विस्रब्धचाटुकशतानि रतान्तरेषु ।
नीवीं प्रति प्रणिहिते च करे प्रियेण
सख्यः शपामि यदि किंचिदपि स्मरामि ॥

अत्र धन्यासीति लक्ष्यते । वाक्यस्यैवात्र शक्तिः ।

वाच्यविशेषनिरूपणाद्यथा—

भुवनाभयदानसक्तशक्तेः
सकलस्वीक्रियमाणसंपदस्ते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न समानधुराधिरोहदोषं
सुमते कोऽपि कदापि कर्तुमीष्टे ॥

अत्र प्राणसमस्य व्यसनेऽपि तटस्थस्तृणमात्रमपि दातुमसमर्थश्च वाच्यः। एवं द्विकभेदास्त्रयः त्रिकभेदश्चैक उदाहार्यः।

दृष्टिं हे प्रतिवेशिनि क्षणमिहाप्यस्मद्गृहे दास्यसि
प्रायो नैव शिशोः पितास्य विरसाः कौपीरपः पास्यति।
एकाकिन्यपि यामि तद्द्रुतमितः स्रोतस्तमालाकुलं
नीरन्ध्रास्तनुमालिखन्तु जरठच्छेदा नडग्रन्थयः ॥

इत्यत्र,

प्राप्तश्रीरेष कस्मात्पुनरपि मयि तं मन्थखेदं विदध्या-
न्निद्रामप्यस्य पूर्वामनलसमनसो नैव संभावयामि।
सेतुं बध्नाति भूयः किमिति च सकलद्वीपनाथानुयाते
त्वय्यायाते वितर्कानिति दधत इवाभाति कम्पः पयोधेः ॥

इत्यत्र,

दुर्वारा मदनेषवो दिशि दिशि व्याजृम्भते माधवो
ह्लादुन्मादकराः शशाङ्करुचयश्चेतोहराः कोकिलाः।
उत्तुङ्गस्तनभारदुर्धरमिदं प्रत्यग्रमन्यद्वयः
सोढव्याः सखि सांप्रतं कथममी पञ्चाग्नयो दुःसहाः ॥

इत्यत्र च नादेयपानीयानयनेन परपुरुषसंभोगस्य नडग्रन्थिलेखनेन संभाव्यमाननखदशनक्षतानां च निह्नवात्मकं वस्तु, भवान्हरिरिति रूपकालङ्कारः, विप्रलम्भशृङ्गारश्च रसो लक्ष्यत इति नोदाहार्यम्। मुख्यार्थस्य बाधाभावात्। असख्या अपि सख्यभिधानस्यैवं संभवात्। आक्षिप्तस्यालङ्कारस्य लक्ष्यत्वे च वह्न्यानयने पात्रानयनस्य लक्ष्यत्वप्रसङ्गात्। अबाधितस्यैव वाच्यस्य रसप्रतीतिकृत्त्वात्। सप्रयोजनायां च लक्षणायां तदतिरिक्तो व्यापारोऽवश्यमङ्गीकर्तव्यः। तथा च सति प्रयोजने लक्षणा। तच्च न मुख्यार्थबाधनिमित्तवत्प्रमाणान्तराद्बोद्धव्यम्। तदर्थमेव लक्षणाशब्दप्रयो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गात्। न खलु शाब्देऽर्थे प्रत्यक्षं क्रमते। नापि तत्पूर्वकमनुमानम्। नानुमानान्तरम्, अनवस्थापत्तेः। न स्मृतिः, तदनुभवाभावात्। सत्यामपि वा तस्यां नियतस्मरणं न स्यात्। तस्माच्छब्द एव तत्र प्रमाणम्। निर्व्यापारश्च शब्दो नार्थप्रतीतिकृत्। व्यापारश्च नाभिधा, तत्र सङ्केताभावात्। न लक्षणा, तस्मिन्सति हि सा न तु तद्विषया। नाप्यस्या लक्ष्ये बाधोऽस्ति। लक्ष्यप्रयोजनयोश्च संबन्धस्य प्रयोजनस्य चाभावात्। तस्यापि लक्षणेऽनवस्थापत्तिरिति न लक्षणा स्यात्। अस्ति च सा। ततः प्रयोजनविषयो व्यापारोऽभ्युपगन्तव्यः। स च ध्वननावगमनप्रकाशनद्योतनादिशब्दव्यवहार्यः।

ननु गङ्गातटे घोष इत्यादिस्वशब्दाद्यादृगर्थप्रतीतिर्न भवति तादृशी गङ्गायां घोष इत्यादेस्तदेव प्रयोजनं पावनत्वादिधर्माक्रान्तं च तटादि लक्ष्यते इति विशिष्टे लक्षणा न तु लक्षिते विशेषाः। एवं हि तटादेः पावनत्वादीनां च धर्मधर्मिभावश्चतुर्थो व्यापार उररीकर्तव्यः। लक्षणाफलं च कथमन्येन क्रियते। न च व्यापारस्य लक्षणात्मनो व्यञ्जनात्मा व्यापारो भवति। शब्दस्यासाविति चेन्न। तर्हि लक्षणायाः प्रयोजनं तस्माद्विशिष्टमेव लक्ष्यते। उच्यते। लक्षणायास्तटादिर्विषयः। न च तत्र पावनत्वादयः सन्ति। तत्कथं विशिष्टे लक्षणा। सामान्यनिष्ठश्च सङ्केत इति त्रितयात्मना सङ्केतभेदेन लक्षणा सा कथं विशिष्टं गोचरीकुर्यात्। व्यज्यते त्वसङ्केतित एव। किंच लक्षणाया गोचरो लक्ष्यो न प्रयोजनम्। प्रत्यक्षस्य हि नीलं विषयः। प्रकटता संवित्तिर्वा फलम्। अव्यभिचाराच्च लक्ष्यसंवित्फलत्वेनोक्ता। एवं ह्यभिधाया अपि फलं शब्दस्य च वाचकस्य संविदेव फलम्। तच्च विना व्यापारान्न संभवति। न च व्यापारस्य व्यापार इति शब्दस्यैवासौ वाच्यः। लक्षणान्वयव्यतिरेकानुविधानं च सव्यापारस्य फलस्येति तस्यास्तत्कार्यं कार्यं च फलमुच्यते। क्रियान्तरप्राप्यस्य यागफलत्वमिव व्यञ्जनशक्तिनिर्वर्त्यस्य प्रयोजनस्य लक्षणाफलत्वम्। नीलविषयस्य प्रमाणस्य यथा नीलनिष्ठैव प्रकटता संविद्वा फलं तद्वल्लक्षणायास्तद्विषयनिष्ठमेव प्रयोजनम्। तेन धर्मधर्मिभावपरिकल्पकं नोपयुज्यते व्यापारान्तरम्। तेन सिद्धमेतल्लक्षणाया अतिरिक्तो व्यापारः समाश्रयणीयः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निरूढा काचनान्या तु कार्या सा काचिदन्यथा ।

अनुलोमप्रतिकूलादिशब्देषु काचन सा वाच्यमर्थं परिहृत्य लक्ष्य एवार्थे वाचकवन्निरूढा । अपरा तु मुख्यार्थबाधनिमित्तप्रयोजनेषु सत्सु कर्तव्या ।

रविणा हृतसौभाग्यस्तुषारावृतमण्डलः ।
निश्वासान्ध इवादर्शश्चन्द्रमा न प्रकाशते ॥

इत्यादावन्धादिशब्देषु अनुपपद्यमानत्वाद्वाच्यमत्यन्ततिरस्कृतमिति विच्छायत्वस्य लक्षितस्यासामान्यत्वं व्यङ्ग्यम् । तथा—

स पुरुषः स च जीवति सत्कृतं
जगति यस्य पराक्रमसंभृतम् ।
भ्रमति सूर्यकरैः सह गामिमा-
मभिनवोदितपल्लवितं यशः ॥

इत्यादौ पुरुषशब्दोऽनुपयुज्यमानत्वाल्लक्षितस्वगतपराक्रमकर्त्वादिधर्मव्यङ्ग्यतदानन्त्यसंक्रमितवाच्यः । रेफद्वयानुगतभ्रमरादिशब्दाभिधेयत्वे द्विरेफशब्दः षट्पदे यथा प्रयुज्यते तथा कोकिलादौ द्विक इत्यादिका अन्यथा न प्रयोज्याः ।

उक्तान्वये च सा पश्चात्

इहानन्त्याद्यभिचाराच्च वाक्यस्य वाक्यार्थ इव विशेषरूपे पदार्थे पदस्य सङ्केतः कर्तुं न पार्यते इति सामान्य एव सङ्केतः । आकाङ्क्षासन्निधियोग्यतावशात्सामान्यानामभिहितानां सतामन्वय इति पदार्थानां वैशिष्ट्यम् । एवं चापदार्थोऽपि वाक्यार्थस्तात्पर्यशक्त्या प्रतिपाद्यते । अत्र पक्षे पूर्वमभिधा, ततोऽन्वयबाधे लक्षणा ।

अन्वितोक्तौ पुनः पुरः ॥ ५ ॥

देवदत्त गामानयेत्याद्युत्तमवृद्धवाक्यश्रवणान्मध्यमवृद्धो विशिष्टं व्यापारं करोति इति दृष्ट्वा व्युत्पाद्यमानो निर्विभागेऽर्थे निर्विभागं वाक्यं वाचकं जानाति । ततो यज्ञदत्त गामानयेत्यादिवाक्यान्तरप्रयोगे सति अन्वयव्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिरेकाभ्यां नियतस्य नियतार्थमवस्यतीति सामान्यावच्छादिते विशिष्ट एव पदार्थे पदानां सङ्केत इत्यन्वितानामेव सतामभिधानमिति विशिष्टानां पदार्थता । अत्र पक्षेऽभिधायाः पुर आदौ लक्षणा विशिष्टस्यैव पदार्थत्वात् ।

द्वये द्वयम्

पदापेक्षयाभिहितान्वयः वाक्यापेक्षया त्वन्विताभिधानमिति द्वयपक्षे द्वयम् । अभिधायाः पश्चात्पुरस्ताच्च सा ।

अखण्डे तु वाक्यर्थो नास्ति सत्यतः ।

वाक्यमेव वाक्यार्थस्य वाचकम् । पदेषु वर्णवद्वाक्येषु हि पदानामनर्थकत्वम् । ततश्च लक्षणा नास्त्येव । कशाभिघातात्तुरगस्य यथा प्रेषितोऽहमनेन धावन इति प्रतिभोदेति तद्वत्प्रतिभावशाद्विशिष्टवाक्यात्प्रतिपत्तिरिति सैव वाक्यार्थः । असत्यभूतप्रकृतिप्रत्ययादिकल्पनवदविद्यापदे पदार्थकल्पनायां तूक्तेषु पक्षेषु त्रयः पक्षाः ।

यश्च संबन्धो लक्षणाया निमित्तं तं पञ्चविधमाहुः । यथोक्तम्—

"अभिधेयेन संबन्धात्सादृश्यात्समवायतः ।
वैपरीत्यात्क्रियायोगाल्लक्षणा पञ्चधा मता ॥" इति ।

तत्र द्विरेफादिशब्दस्य भ्रमरादिः शब्दोऽभिधेयः । तत्संबन्धात्तेन षट्पदो लक्ष्यत इति अभिधेयसंबन्धनिमित्तता । सादृश्याद्यथा सिंहो माणवक इति । यथा वा—

वर्षे समस्त एवैकः श्लाघ्यः कोऽप्येष वासरः ।
दिनैर्महत्तयान्वेयो यो न पूर्वैर्न चापरैः ॥

अत्र प्रकरणवशान्महापुरुषः कश्चिल्लक्ष्यते यस्य कुले पूर्वे भाविनो वा पुरुषा न समानत्वमुपयान्ति । समवायः उक्तसंबन्धेभ्योऽन्यः संबन्धः । ततो यथा[1]·····। सामीप्यात् गङ्गायां घोष इति । तथा साहचर्यात् छत्रिणो यान्तीति । अत्र हि छत्रिसाहचर्यादच्छत्रा अप्येवं व्यपदिश्यन्ते । वैपरीत्याद्यथा कातरे भार्गव इति । क्रियायोगाद्यथा—

---

१ आदर्शपुस्तकेऽयमंशस्त्रुटितः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पृथुरसि गुणैः कीर्त्या रामो नलो भरतो भवान्
महति समरे शत्रुघ्नस्त्वं तथा जनकः स्थितेः ।
इति सुचरितैर्मूर्तिं बिभ्रत्पुरातनभूभृतां
कथमसि न मांधाता देव त्रिलोकविजय्यपि ॥

अत्राशत्रुघ्नेऽपि शत्रुहननक्रियायोगाच्छत्रुघ्नत्वेन व्यपदेशः ।

प्रज्ञानैर्मल्यवैदग्ध्यप्रस्तावादिविधायुजः ।
अभिधालक्षणा योगी व्यङ्ग्योऽर्थः ग्रथितो ध्वनेः ॥

यथा सङ्केतेन मुख्यार्थबाधादित्रितयेन च सहायेनाभिधायको लक्षकश्च, यथा वा पक्षधर्मान्वयव्यतिरेकसहगतो विवक्षाया अनुमापकः, तथा प्रतिभा-नैर्मल्यविदग्धपरिचयप्रकरणादिज्ञानसापेक्षो वाचको लक्षकश्च व्यङ्ग्यमर्थं ध्वनिशब्दो व्यनक्ति । तत्र व्यङ्ग्यः पदप्रकाश्यो यथा—

वाणिअअ हत्थिदन्ता कुत्तो अह्माणं वग्घकित्तीअ ।
जाव लुलिआलअमुही घरम्मि परिसक्कए सुण्हा ॥
[वाणिजक हस्तिदन्ताः कुतोऽस्माकं व्याघ्रकृत्तयश्च ।
यावल्लुलितालकमुखी गृहे परिसंक्रामति स्नुषा ॥]

वाक्यप्रकाश्यो यथा—

अत्ता एत्थ णिमज्जइ एत्थ अहं दिअसअं पलोएहि ।
मा पहिअ रत्तिअन्धअ सेज्जाइ मह णिमज्जहिसि ॥
[श्वश्रूरत्र निमज्जति अत्राहं दिवसके प्रलोकय ।
मा पथिक रात्र्यन्ध शय्यायामावयोर्निमङ्क्ष्यसि ॥]

अत्राभिधामूलं व्यञ्जनम् । लक्षणामूलं यथा—"निःश्वासान्ध इवादर्शे" इत्युदाहृतम् ।

स एव गुणभूतः पदप्रकाश्यो यथा—

कर्ता द्यूतच्छलानां जतुमयशरणादीपनः सोऽभिमानी
कृष्णाकेशोत्तरीयव्यपनयनपटुः पाण्डवा यस्य दासाः ।
राजा दुःशासनादेर्गुरुरनुजशतस्याङ्गराजस्य मित्रं
क्वास्ते दुर्योधनोऽसौ कथयत न रुषा द्रष्टुमभ्यागतौ स्वः ॥

अत्र एते वराका दासभावं गताः किं करिष्यन्ति अस्मदेकशरणाः परि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भविष्यन्ति इत्यादि भूतकाले भवद्भिश्चिन्तितमासीन्नास्माकं विस्मृतम्। तत्र काचित्प्रतिक्रिया निर्व्यूढा, न किं निर्व्यूढा इत्यादिकं तमर्थमभिव्यज्य सर्वैरेव कर्ता भूतच्छलानामित्यादिभिर्वाच्य एवार्थे विश्रम्यते।

वाक्यप्रकाश्यो यथा—

वाणीरकुडङ्गोड्डीणसउणिकोलाहलं सुणन्तीए।
घरकम्मवावडाए वहुए सीअन्ति अङ्गाइं॥

[वानीरकुञ्जोड्डीनशकुनिकोलाहलं शृण्वन्त्याः।
गृहकर्मव्यापृताया वध्वाः सीदन्त्यङ्गानि]

अत्र दत्तसङ्केतः पुरुषो वानीरलतागृहं प्रविष्ट इति व्यङ्ग्यमर्थमवगमय्य वाच्योऽर्थः स्वप्राधान्येनास्ति। न चैवमभिधाया लक्षणाया वा कश्चिदवसर इति भिन्नमेव ध्वननम्।

ननु यत्परः शब्दः स शब्दार्थ इति व्यङ्ग्याभिमतोऽपि तात्पर्यात्कथं न वाच्यः। इह सर्वाण्येव कारकाणि कारकत्वात्सव्यापाराणीति साध्यायमानान्यतो भूतभव्यसमुच्चारणे 'भूतं भव्यायोपदिश्यते' इति अदग्धदहनन्यायेन यावदविहितं तावद्विधीयते इति क्वचित्कारकपदार्थोऽपि विषयो भवति। यथा 'दध्ना जुहोति' 'पयसा जुहोति' इति। एवं हि पूर्वो धावतीत्यपरार्थेऽपि तात्पर्यं स्यात्। अन्वितः पदार्थोऽभिहितान्वये, अन्वितमात्रं त्वन्विताभिधाने। तत्रैव सङ्केतोपपत्तेः। अन्वितविशेषस्तूभयमतेऽप्यवाच्य एव। एवं च वाच्यत्वे का वार्ता वाच्यविपरीतात्मनो व्यङ्ग्यस्य। न तु व्यङ्ग्यमनुमेयमिति शक्यं वक्तुम्। न हि वाच्यव्यङ्ग्ययोः प्रतिबन्धग्रहे किंचित्प्रमाणं क्रमते। प्रकरणादिसामग्रीमन्तरेण हि न व्यङ्ग्यम्। न च सा प्रमाणगोचरा। व्यङ्ग्यवाचिनां त्वदोषः। एवंभूतायां प्रमाणैरप्रतिपन्नायां हि सामग्र्यामुपपत्तिमनपेक्ष्यापि समुदयमाना प्रतीतिः केन निह्नोतुं शक्यत इति सिद्धमभिधातात्पर्यलक्षणाव्यापारातिरिक्तं ध्वननम्। एतच्चान्यत्र विस्तरेण विचारितमिति संक्षेपेणेहोक्तमिति शिवम्॥

इति निखिलविपश्चिच्चक्रवर्तिश्रीराजानकमम्मटाचार्यविरचितः
शब्दव्यापारविचारः समाप्तः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विक्रेयानि संस्कृतनूतनमुद्रितपुस्तकानि ।

अलंकारग्रन्थाः ।

किं.

अलंकारशेखरः—श्रीमाणिक्यचन्द्रकारितः, श्रीकेशवमिश्रकृतः. ॥-

अलंकारसर्वस्वम्—राजानकरुय्यककृतं, जयरथकृतटीकासहितम्. १।

अलंकारकौस्तुभः—श्रीविश्वेश्वरपण्डितविरचितः, स्वोपज्ञव्याख्या. ३

कर्णभूषणम्—श्रीगङ्गानन्दकविराजप्रणीतम्. ... ... ॥-

काव्यप्रदीपः—महामहोपाध्यायश्रीगोविन्दविरचितः, तत्सदुपाख्यवैद्यनाथकृतया टीकया सहितः. ... ... २ ८=

काव्यालंकारसंग्रहः—(महामहोपाध्यायश्रीमदुद्भटप्रणीतः) श्रीमत्प्रतीहारेन्दुराजविरचितया काव्यालंकारसारलघुवृत्त्या समेतः. ॥= ८=

काव्यालंकारसूत्राणि—(वृत्तिसहितानि) अयमलंकारशास्त्रस्य मूलभूतो ग्रन्थः पण्डितमान्योस्ति.... ... ... ॥- ८-

काव्यालंकारः—रुद्रटकृतः, नमिसाधुकृतटीकया सहितः. ... १॥ ८-॥

काव्यानुशासनम्—श्रीमद्वाग्भटविरचितं, स्वकृतटीकासहितम्. ॥= ८-

काव्यानुशासनम्—आचार्यहेमचन्द्रविरचितम्, स्वोपज्ञालंकारचूडामणिव्याख्यासहितम्. ... ... २। ८=

कुवलयानन्दः—(चन्द्रालोकेन-अलंकारचन्द्रिकाव्याख्यया च सहितः.) वर्णक्रमकोशसहितः. ... ... ॥।= ८=

कुवलयानन्दकारिकाः—आशाधरकृताः, स्वकृतालंकारदीपिका. ॥ ८-

चित्रमीमांसा—श्रीमदप्पयदीक्षितप्रणीता, चित्रमीमांसाखण्डनं च पण्डितराजजगन्नाथविरचितम्. ... ... ॥।= ८-॥

ध्वन्यालोकः—श्रीमदानन्दवर्धनाचार्यकृतः, श्रीमदाचार्याभिनवगुप्तविरचितया टीकया सहितः । उद्द्योतत्रयात्मकोयं ग्रन्थो मूलार्थ-व्यङ्ग्यार्थ-ध्वन्यर्थादीनां सम्यग्ज्ञानसाधने उपयुक्ततर एव. १

रसगङ्गाधरः—(अलंकारः) महाकविश्रीजगन्नाथपण्डितराजविरचितः, महामहोपाध्यायनागेशभट्टकृतटीकासहितः. ३

साहित्यकौमुदी—(अलंकारः) श्रीविद्याभूषणविरचिता, कृष्णानन्दिनीटीकासहिता.... ... ...

साहित्यदर्पणः—विश्वनाथकविराजप्रणीतः, श्रीरामचरणतर्कवागीशभट्टाचार्यकृतटीकासहितः. ... ...

साहित्यसारम्—अच्युतरायमोडककृतं, स्वकृतव्याख्यासहितम्.

इत्यन्यानि च पुस्तकानि मूल्ये प्रेषिते व्ही. पी.-द्वारा वा प्रहितानि

निर्णयसागरमुद्रणालयाधिपति

तुकाराम जावजी.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu